कविकुलगुरू - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

१ श्री १

श्रीरामचंद्राय नमः ॥ वेदांतविज्ञानसुनिश्चितार्थैर्योगीश्वरैर्ध्येयमजं विशुद्धं ॥ उमानुमान्या मधिगम्यमान-
वंदे महेशं सदनुग्रहेच्छं ॥१॥ विघ्नेशादीन्नमस्कृत्य माधवाख्य सरस्वती ॥ शिवादित्यकृते टीकां
कुरुते मितभाषिणीं ॥२॥ विघ्नेष्टदेवतानमस्कारानुमितेति बोधितकर्तव्यताकं कर्तव्यविषयवि-
घ्नविघातकं परमेश्वरनमस्कारलक्षणं मंगलमाचरन्नर्थाद्विषयप्रयोजनसंबंधाधिकारिणो दर्शी-
यतीति व्यवइति ॥ ननु नमस्कारादिमंगलाचरणं फलप्रमाणयोरभावादयुक्तमिति चेन्न फले ता-
वत्कर्तव्यविषयविघ्नध्वंस एव वरीवर्त्तिनन्वविष्टसमाप्तिः न च मंगलस्यान्वयव्यतिरेकाभ्यां व्य-
भिचारात् कृतेऽपि मंगले कादंबर्यादौ समाप्त्यभावात् अकृतेऽपि मंगले नास्तिकानुष्ठितकर्मस-
माप्तेः विघ्नध्वंसस्तु नैवं यावन्मंगलं तावद्विघ्नध्वंसांगीकारात् ॥ विघ्नध्वंसकामानां तद्दर्शनाद्वारानु-
त्रश्रन्या विघ्नध्वंसकामो नमस्कारादिकमाचरेदित्यैवरूपस्या विघ्नध्वंसमंगलयोः कार्यकारण-
भावबोधनेनाव्यभिचारात् समाप्तिस्तु प्रतिबंधकदुरितध्वंससहकृतमलोकावगतेदिवेन
वति यथा कारिरीयागेनावग्रहध्वंसे वृष्टिः स्वकारणाद्भवतीति तद्वत् केचित्तु समाप्त्यभावो विघ्न-

॥१॥ x वार

॥१॥ स्वकारण

Acc. No. ~~414~~ M.1746 M-1746
Title - मितभाषिणी.
Author - शिवादित्य.
Date - ?
Subject - न्याय.
folio - ~~[illegible]~~ 49
Xerox - 96.

KKSU LIBRARY
RAMTEK
441 106
M-1746
Dist Nagpur

Checked 2012

दिदोषवत एव कर्माणि विधीयंते। नाद्वैतज्ञानवतः। अत एव हि वक्ष्यति। सर्व एते पुण्यलोका भवंति ब्रह्मसंस्थोऽमृ
तत्रैतस्मिन्नद्वैतविद्याप्रकरणेऽभ्युदयसाधनान्युपासनान्युच्यंते। कैवल्यसन्निकृष्टफलानि चाद्वैतादीषद्विकृत
णि मनोमयः प्राणशरीर इत्यादीनि कर्मसमृद्धिफलानि च कर्मांगसंबंधीनि रहस्यसामान्यान्मनोवृत्तिसामान्याच्च
ज्ञानं मनोवृत्तिमात्रं तथान्यान्यप्युपासनानि मनोवृत्तिरूपाणीति। अस्ति हि सामान्यं। कस्तर्ह्यद्वैतज्ञानस्योपासनानां।
ष उच्यते। स्वाभाविकस्यात्मन्यविद्याध्यारोपितस्य कर्त्रादिकारकक्रियाफलभेदविज्ञानस्य निवर्त्तकमद्वैतविज्ञानं र
विव सर्पाद्यध्यारोपलक्षणज्ञानस्य रज्ज्वादिस्वरूपनिश्चयः प्रकाशनिमित्त उपासनं तु यथाशास्त्रसमर्पितं किंचिदाल
मुपादाय तस्मिन्समानचित्तवृत्तिसंतानकरणं तद्विलक्षणप्रत्ययानंतरितमिति विशेषः। तान्येतान्युपासनानि
त्वशुद्धिकरत्वेन वस्तुतत्वावभासकत्वादद्वैतज्ञानोपकारकाण्यालंबनविषयत्वात्सुखसाध्यानि चेति पूर्वमुपन्य
स्यंते। कर्माभ्यासस्य दृढीकृतत्वा कर्मपरित्यागेनोपासन एव दुःखं चेतः समर्पणं कर्त्तुमिति कर्मांगविषयमेव तावदा
दावुपासनमुपन्यस्यते॥ ॥ओमित्येतदक्षरमुद्गीथमुपासीत। ओमित्येतदक्षरं परमात्मनोऽभिधानं नेदिष्ठं। तस्मिन्हि
प्रयुज्यमाने स प्रसीदति। प्रियनामग्रहण इव लोकः। तदिह ति परं प्रयुक्तमभिधायकत्वाद्व्यावर्त्तितं शब्दस्वरूपमात्रं

[illegible] भूत्येषां [illegible] मित्यादिकथनं परमात्म ३
मुपव्याख्या नंप्र ५

ना० प्रतीयते।तथाचार्चादिवत्परस्यात्मनः प्रतीकं संपद्यते।एवं नामत्वेन प्रतीकत्वेन च परमात्मोपासनसाधनं श्रेष्ठमिति सर्ववेदांते
ष्ववगतं।जपकर्मस्वाध्यायाद्यंतेषु च बहुशः प्रयोगात्प्रसिद्धमस्य श्रैष्ठ्यं।अतस्तदेतदक्षरं वर्णात्मकमुद्गीथभक्त्यवयवत्वादुद्गीथ
शब्दवाच्यमुपासीत।कर्मांगावयवभूतओंकारे प्रतीके दृढामेकाग्र्यलक्षणांमतिं संतनुयात्।तमुपासीत स्वयमेव श्रुतिरोंका
रस्योद्गीथशब्दवाच्यत्वे हेतुमाह।ओमिति ह्युद्गायति।ओमित्यारभ्य हि यस्मादुद्गायति अत उद्गीथ ओंकार इत्यर्थः।तस्योप
व्याख्यानं।तस्याक्षरस्योपव्याख्यानं प्रवर्तत इति वाक्यशेषः।एषां चराचराणां भूतानां पृथिवी रसो गतिः परायणमवष्टंभः पृ
२ थिव्या आपोऽप्सु ह्योताश्च प्रोताश्च पृथिव्यतस्ता रसः पृथिव्याः।अपामोषधयो रसोऽपां परिणामत्वादोषधीनां।तासां पुरुष
न्नपरिणामत्वात्पुरुषस्य।तस्यापि पुरुषस्य वाग्रसः।पुरुषावयवानां हि वाक्सारिष्ठाऽतो वाक्पुरुषस्य रस उच्यते।तस्या
पि वाच ऋग्रसः सारतरा।ऋचः साम रसः सारतरं।तस्यापि साम्न उद्गीथः प्रकृतत्वादोंकारः सारतरः।एवं स एष उद्गी
ओंकारो भूतादीनामुत्तरोत्तररसानामतिशयेन रसो रसतमः।परमः परमात्मप्रतीकत्वात्।परार्ध्यः अर्द्धं स्थानं परं च त
दर्हतीति परार्ध्यः परमात्मस्थानार्हः।परमात्मवदुपास्यत्वादित्यभिप्रायः।अष्टमः पृथिव्यादिरससंख्यायां।यदुद्गीथो य उ
वाच ऋग्रस इत्युक्तं।कतमा सा ऋक्।कतमं तत्साम।कतमो वा स उद्गीथः।कतमा कतमेति वीप्सादरार्था।ननु वा बहूनां जातिपा

३

ममद्भुत्यजन्वयः नमःस्वस्तीत्यादिनाचतुर्थीव्रांसकरवंलवन्यस्यादितिव्यक्तपत्यास्त्रकु
वंदनादेरपिनमस्कारः कृतस्यान्तेश्वरस्य अनन्तकं गुरुवइति। द्विनादिनप्राप्तिपरिहारो
परिष्टा गुरुः नसौ इत्यर्थः। स्त्रगादेरचेतनत्वेन गुरुत्वाभावान्नतस्यनमस्कारः गुरुत्वे हेतुमा
द्विद्यानांप्रभवइति। विद्याशब्दो विदज्ञानइत्यस्मात्संज्ञायांसमजनिषदनिपतमन
विदषुञ्शीङ्भृञिणइतिसूत्रेणक्यपप्रत्ययांतो ज्ञानवचनः तेनचतनुत्पादकानिविद्या
स्थानानिलक्ष्यंते। तानितु पुराणन्यायमीमांसाधर्मशास्त्रांगमिश्रिताः। वेदाःस्थानानि
विद्यानांधर्मस्यचचतुर्दश॥ आयुर्वेदो धनुर्वेदो गांधर्वश्चार्थशास्त्रकमितिस्मृत्युक्ता
निविद्यास्थानानांप्रभवंतद्वक्तृत्वं विद्यानांवक्तृत्वात् गुरुत्वमित्यर्थः। विद्यानांप्रभवेगुर
वत्त्वेनमहत्त्वंकेपिनविवक्षितेश्वरनमस्कारसिद्धिः योगीनांमुनीनांचकतिपयविद्यास्थान
वक्तृत्वंगुरुत्वंसंभवति अतउक्तंसर्वेति। सर्वविद्यास्थानानांप्रभुत्वंचनतादृक्त्वेमात्रंकिंतु

सि०

ते१

स्वतंत्रवक्तृत्वं मुनीनां गुरुः सर्वकालान्न स्वतंत्रकर्तृत्वमिति परमेश्वरस्यैवायं नमस्कारो
नान्यस्येति सिद्धं । प्रत्यु[illegible] सर्वे रागाद्युत्पन्ना एवेति पक्षमाश्रित्य व्याख्यायते । विप्रसंन्योडु, संज्ञा
यामिति सूत्रेण मितंडुआदिभ्य इति वार्त्तिकेन मितंडुः रांम्भुरित्यादिरूपसिद्ध्यर्थं असंज्ञायां डुप्रत्य
य इति विधानाच्छंभु[illegible] यौगिको व्याख्यातो । अथ गुणादि प्रसिद्धिबलाच्छंभुशब्दो परमेश्वरे
रूढ इति पक्षमाश्रित्येदमेव व्याख्यायते शं नवेदपरमेश्वराय नम इति अन्वयः । विद्यारं
भे परमेश्वर एव नमस्कार्यः इत्याह । सर्वविज्ञानामिति अन्यासमस्तविद्यानां प्रभुर्वस्यो[illegible]दिनिःस्
वसनत्वस्य च्छत्वेन मात्ता[illegible]वसर्वविद्यानामिति । सर्वविद्यानां प्रभुत्वेन त्वनेन स्वतंत्रत्वमुक्तं भव
मिति यावत् तेन परमेश्वरस्य ब्रह्मणंकतिपयविद्यावक्तृत्वे व्यावृत्यर्थं सर्वेति योगिव्यावृत्यर्थं स्वा
तंत्रेइष्टव्यं । गुरु[illegible] वेत्तं मेवे[illegible] नम इति समानाधिकरण्येन गुरुदेवतयोरैक्येन चिंतनं वि
द्याप्राप्तावंतरंगमिति तदारंजे कार्यमिति सूचयितुं यो वेद्[illegible] न नुलक्षणं व्याहर्तुमिच्छुर्न हारं वाजनयति
ननु तद्दृश्यं साधयति [illegible]तः परमेश्वरसाधनाय प्रमाणं नोन्यमत आह हेतवे इति ॥ ॥जेगंग्यपाल इ

॥३॥

॥३॥

5

ज० सिद्धांति१ रा१ [illegible] वं३ कां४ मद्यागगमे

[illegible]ति उक्तं ति विना[illegible]धर्म कालिकार्याक्रिते बौद्धेतवे निमित्तकारिणामेत्यर्थः जायमानं कार्यं कर्तारं
[illegible]विनानस्तं भवनीति तनमाक्षिपति स एव परमेश्वर इति प्रमाणस्त[illegible] चितांगयोगरूक् सर्वे कार्यं
सहेतुकं कादाचित्कयोन्नयन्नहेतुकं तन्नैवति तलूकादावि[illegible]ने इति केवलव्यतिरेकि हे[illegible]नूहे
नाचकर्त्राविवक्ष्यते अतो दृष्टांतदिखीर्नसिद्धसाधनं ॥ नेनु केवलव्यतिरेकीनुमानं प्रमाणं व्याप्तिपक्षधर्मतावि
शिष्टलिंगज्ञानजन्यानुमितयथादि गोधूमवान्सोग्निमानिति महानसादौ व्याप्तस्य पक्षे[illegible]द्वि व्याप्तधूमवानान
यमिति ज्ञातस्य अनुमितिजनकत्वं दृष्टं केवलव्यतिरिकिलिंगस्य हेतुकवान्वयको[illegible]नान्वयो
व्याप्तिसंपादित्कवेस्य पक्षधर्मता अतो व्याप्तिपक्षधर्मतावैशिष्ट्यं लिंगस्य नास्तीति कथं तत्प्रमा॥
अथ व्यतिरेकव्याप्तिमनेया अन्वयव्यतिरेकिवत् केवलव्यतिरेकिणोप्यन्वयव्याप्तिरनुमी
यत इति मन्यसे तर्हि नसदर्शनेन विना व्यतिरेकसदर्शनादप्रामाकालेना अवश्यव विपर्या
सवच्छन्नसाध्याभावकालनेतिहेत्वे अन्वयवन्नादृष्टस्योपलब्धत्वात् तयानदन्यविपर्यासस्यापि तथात्वा
दिति अतो न व्यतिरेकी प्रमाणमिति चेन्नैवं संस्था॥ केवलव्यतिरेकिण्यपि निरूपाधिक
व्यतिरेकसहचारेणान्वयव्याप्तिमनुमायत द्दिशिष्टस्य हेतोर्गमिकत्वांगीकारान्नान्वया

उ०

वि०

मि०

केवलव्यतिरेकिसंज्ञा तस्य व्यतिरेकसहचारादेव६
व्यं निरूपाधिकसहचारव्याप्त्योरेकत्वात्कथं तेन तदनुमानमुक्तं आत्माश्रयदोषापत्तिरिति
तया भेदात् । तथा हि । उभयोः सामानाधिकरण्यं हि सहचारः । साधनसमानाधिकरणात्यन्ताभावाप्रति
योगी साध्यवच्चेद्धेतोर्व्याप्तिरिति अतो नाप्रागेकालता अन्वयव्याप्तेरेव प्रथमं प्रदर्शितात् । अतो न केव
लव्यतिरेक[illegible] प्रमाणं । नन्वेवमनयोः सहचरेणान्वयव्याप्त्यनुमानेतिप्रसंगः । धूमवह्निसहचारेण घटपद
योऽपि व्याप्तिमत्त्वप्रसंगादिति चेन्मैवं । अनययोरभावयोः सहचारस्यान्वयप्रतियोगिनोरेव व्याप्तिरिति प्रति
योग्यनुयोगिभावस्य नियामकत्वात् ।। ननु घटादौ हेतुसाध्ययोः सहचारः अन्वयव्यतिरेकौ वा
यं न केवलव्यतिरेकी । अथ सर्वस्य पक्षीकृतत्वेन पक्षातिरिक्तसपक्षाभावान्नान्वयव्यतिरेकि
त्वमिति मन्नु चेन्न दृष्टान्ते निश्चितसाध्यवतो हि सपक्षत्वे न तु पक्षातिरिक्तत्वे स- [illegible] त्यपि गौरवेण व्य
र्थत्वात् । तथा च किरणावलीकारः । पृथिवीप्रकरणे सर्वपक्षेऽपि [illegible] हस्य समस्तपृथिव्या
।।४।। इतरभेदे साध्ये घट एव दृष्टान्तो नोक्तः किं व्यतिरेकेणेति अतोऽन्व [illegible] यव्यतिरेकित्वमेवास्ये ।।४
ति चेन्न सत्यमाह नवान् । तथापि अन्वयव्याप्तिवद्व्यति [illegible] रेकव्याप्तेरपि गमक

चावधारणात् अन्वयाप्रतिसंधाने व्यतिरेकि प्रयोगसंभवात्। यद्वा पक्षातिरिक्त एव सपक्ष इति मत
माश्रित्यायं प्रयोगो दृष्टव्यः बह्न्यादि समत्वानुमानवतो गौरवस्यापि न्याय्यत्वादिति। अत एव वादे स्मा
चार्यैस्तत्रैव सिद्धांते प्रोक्तं तावदेतद् उपदेशः व्यतिरेकानुमानं तु निर्व्यूढमिति। अथवा सहेतुकमिति सा
ध्यस्थाने सर्वं विहेतुकमिति कृतेऽन्वयेन तथाच नान्वयित्वात् काननं सर्वं विहेतुकस्याप्रसिद्ध्याप्रसि
द्धविशेषणः पक्षः को दोष इति चेत् अयं दोषः व्यतिरेकि साध्याप्रसिद्धौ तन्निरूपणाधीन साध्याभा
वसाधनाभावयोर्व्याप्तिर्न निरूप्येत साध्यसामान्ये ज्ञानाभावेन पक्षे साध्यसंदेहानुपपत्तौ संदिग्ध
साध्यवतः पक्षस्याभावापत्तिः तथा साध्यलक्षणविशेषणज्ञानाभावात् साध्यविशेषणकपक्षवि
शेष्यकानुमित्यनुपपत्तिः। विशेषणज्ञानकारणाभावात् तथाचाप्रसिद्धविशेषणत्वे दोषत्रयं व्याप्तिनि
रूपणाद्याधातासिद्धिः पक्षानिरूपणादाश्रयासिद्धिः अनुमित्यनुदयाद्बाधश्चेति न स्मात् सर्वं विहेतुक
स्याप्रसिद्धिर्वाच्येति चेत् सत्यं यथैव पि सामान्यतः प्रसिद्धिः तथा हि किं चित् सहेतुकं वं अहेतु
कव्यतिरिक्तं निष्ठात्यंताभावप्रतियोगि व्यतिरेकि धर्मत्वात् घटत्वादिवत् प्रमेयत्वादौ व्यभिचारवारणाय व्य

अस्तु

तिरेकीत्युक्तं। आकाशादिनिष्ठात्यंताभावप्रतियोगितया सिद्धसाधनतावारणाय हेतुकव्यतिरिक्तेति निष्ठात्यंताभावविशेषणं तथा च किंचिद्धेतुकवृत्तेर्यतो भावस्तेन तदवसर्वदृष्टहेतुकत्वं प्रसिद्धं न तद्व्यक्तिगत्या पक्षेऽपवतत्र केवलव्यतिरेकिणा तद्विशेषणः साध्यतदूति नाप्रसिद्धविशेषणकः पक्षः। न स्वाभ्युपगतादेतवद्वृत्तेन नेश्वरसाधकव्यतिरेक्यनुमानमसूचि॥ ॥यद्वाऽनेनान्वयव्यतिरेक्यनुमानमेव सूच्यते। तथा हि। गिरिदरीविवरवर्तिनोऽङ्कुराः सकर्तृकाः कार्यत्वात् घटवदिति। नन्वत्र संदिग्धानैकान्तिकः क्षित्यादौ संदिग्धसाध्यवति देनोः सत्वात् न तु निश्चितसाध्याभाववति हेतुसंदेहे संदिग्धानैकान्तिकता। अत्र साध्यस्येव संदेहो न तु हेतोरिति वाच्यं हेतुः साध्याभाववृत्तिर्न वेति संदेहे संदिग्धानैकान्तिकेति नासत्त्वसंदेहः साध्याभाववति हेतुसंदेहो हेतुमति वा साध्यसंदेहो न तु क्षित्यादौ कार्यत्वहेतोर्निश्चयेऽपि साध्यसंदेहाद्धेतोः साध्याभाववत्त्वेऽपीव संदेहोऽस्त्येव किंचेदं सकर्तृकत्वं कर्तृसहवर्त्तमानत्वं वा कर्तृजन्यत्वं वा नाद्यस्तथापि सिद्धसाधनात् तथा हि जीवानां विच्चुवेतनांकुराणां तैः सहवर्त्तमानत्वात्। भोजकादृष्टजन्यत्वेन जीवजन्यत्वाच्च सिद्धसाधनं॥ अथोपादानगोचरापरोक्षज्ञानचिकीर्षाकृति

॥५॥

॥५॥

a

६४

मज्जन्यत्वं सकर्तृकत्वं उपादानं समवायिकारणं तद्गोचरो विषयो यासाम् अपरोक्षज्ञानचिकीर्षाकृतीनां ता
स्तथा इदमस्योपादानमिति लिंगाद्यजन्यज्ञानमपरोक्षं इदं करिष्यामीति कर्तुमिच्छा चिकीर्षा कृतिः प्रयत्नः
एता यस्यासौ तद्वान्॥ तेन जन्यत्वमिति विवक्षितं एतच्च नास्मदादीनामिति न सिद्धसाधनमिति चेन्नैवं
सिद्धसाधनत्वादेव अस्मदाद्यपरोक्षज्ञानादेरपि अदृष्टद्वारांकुराद्युपादानगोचरत्वात् तथाहि॥ ॥दृष्टसाधन
ताज्ञानस्य परोक्षत्वे यागादिसाधनेष्वादौ प्रवृत्तिविषयेऽपरोक्षज्ञानेऽस्त्येव ततस्तत्र चिकीर्षाप्रयत्नौ ततो यागा
दीनादृष्टं जायते तेन च ॥ भोजकादृष्टेन तत्तदुपादानसंहितेनांकुरादि जन्यते॥ अतोऽस्मदादिनैव सिद्धसाधनमिति
व ५ दुष्टमिदमनुमानमिति चेन्मैवं वादीन्नेताहि संदिग्धानैकान्तिकता साध्यसंदेहवति निश्चितस्य हेतोस्तथाज्ञानाभावात्॥ अ
न्यथा सर्वेषां हेतूनां पक्षे संदिग्धसाध्यवति वृत्तेर्दुष्टत्वप्रसंगात् तथा च सकलानुमानोच्छेदप्र
संगः॥ अत एव सिद्धांतप्रवादोऽपि न हि पक्षे पक्षतुल्ये व्यभिचार इति॥ अपि च पक्षसपक्षसमव्यति
रिक्ते घटादौ कार्यत्वहेतोः सकर्तृकत्वेन व्याप्तेरवधारणात् स च हेतुः क्षित्यादौ पक्षे समे
अंकुरादौ पक्षे च वर्तमानः सममेवोभयत्र साध्यं साधयतीति निश्चितव्याप्तेर्हेतोः संदिग्धसाध्य

मिः

वर्तिवृत्तिमानस्यं साध्यसाधकत्वनियमात् । सकर्तृकत्वं चेदं विवक्षितं । अदृष्टाद्वारिकोपा
दानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यत्वमिति । अदृष्टं धर्माधर्मौ द्वारं व्यापारो न विद्य
ते यासां ताः अदृष्टाद्वारकाश्च ताउपादानगोचरापरोक्षज्ञानचिकीर्षाकृतयश्च तद्वज्जन्यत्वं स
कर्तृकत्वमित्यर्थः ॥ तथा च नास्म[redacted]दादीनां सिद्धसाधनं । अस्मदज्ञानचिकीर्षाकृती
नां अदृष्टद्वारं विनाउपादानगोचरत्वाभावेन अदृष्टाद्वारकत्वाभावात् । भोविज्ञानमदृष्टजनक ५
द्वाराद्धेतुः कर्तृज्ञानचिकीर्षाकृतिशरीरचेष्टादिद्वारा न तथा चादृष्टाद्वारकविशेषणेन सोट
तु[illegible]न्यत्वे निवर्तकटजन्यत्वेन पर्य्यवस्यदीश्वरजन्यत्वमेव सिद्ध्यतीति न कश्चिद्दोष इति
सिद्धं ॥ ननु तथापि प्रध्वंसस्य कार्यत्वेपि उपादानकारणाभावेन तज्ज्ञेश्वरज्ञानादिमतोभावात् ॥६॥
॥६॥ तज्जन्यत्वं नास्तीति हेतुरनैकांतिक इति चेन्नैवं प्रागभावप्रतियोगित्वे सति समवेतत्वादिति हेतु
[illegible]र्थस्य विवक्षितत्वान्नूत[illegible]संक्षेपः अंकुराः अदृष्टाद्वारकोपादानगोचराप[illegible]रोक्षज्ञानचि
कीर्षाकृतिमज्जन्याः प्रागभावप्रतियोगित्वे सति समवेतत्वात् यदुक्तं साधनं तदुक्तं
×केन

य

वे४

साध्यं यथा घट इत्यत्र परम्यते विस्मारात्॥ जगतामेवेति एवकारः कार्त्स्न्यवाची अव्ययानामनेकार्थत्वात्त
थाचासमर्थः॥ ॥समस्तकार्यस्यहेतुः परमेश्वरः ननु कुलालादिवत् कतिपयस्येति चेत् न वचनस्यकवि
जलाधिकरणन्यासेन शिवेनापि संभवात् अथवा एवकारो भिन्नक्रमः हे नव एवेति तत्र कायोगान्ययोग
व्यवछेदार्थः जगतांहेतुत्वे ईश्वरस्य सदावर्तते ननु कदाचिन्नास्तीति एवं वह्लिकः सर्वज्ञो जगद्धेतु
कपिलादिर्वेदादिहेतुः हिरण्यगर्भ एव स्वतंत्रो जगद्धेतुः अधानं जगद्धेतुरित्यादिमतानि निरकेष्यंते। य
द्वाद्वैतवेनिमित्तकारणमेव ननु वेदांतिवदुपादानकारणमिति स्त्वचिंतोपादानत्वे कार्यस्यापिस
चेतनत्वप्रसंगादिति॥ संस्थारस्थितिहेतुत्वेनापि परमेश्वरः सिद्ध्यतीति प्रमाणांतरमाकांक्ष्यंस्त
स्वनौयाह संसारार्णवसेतवेति संसारः एकविंशतिप्रकारो दुःखसंबंधः स चार्णवो दु
स्तरत्वात् अनादित्वेनागाधत्वाद्वा तस्य सेतवे विधारकाय यथा सेतुर्जलादेराधारस्त
थासंसारिणां जगतां च आधारः स्थितिहेतुरित्यर्थः॥ स एव सेतुर्विधरण एषांलो
कानामसंभेदायेति श्रुतेः सेतुशब्देन सेतुगतविधारणत्वं लक्ष्यते। प्रयोगस्तु ज

ये

शि५

स्तदीयानुबंधचतुष्टयेनैवास्य तद्वत्त्वं तत्र च परमेश्वरो महान्विषयः॥ मोक्षश्च महत्प्रयो-
जनं॥ पदार्थास्त्ववांतरविषयाः तत्त्वज्ञानमवांतरप्रयोजनं॥ विषयशास्त्रयोः प्रतिपाद्यप्रतिपा-
दकभावः संबंधः विषयप्रयोजनयोर्विषयविषयीभावः संबंधः शास्त्रप्रयोजनयोः साध्यसाध-
संबंधः ४ नभावः प्रयोजनकामोधिकारीति॥ नन्वेवं शास्त्रप्रकरणयोः को भेद इति चेत् शास्त्रैकदेश-
द्व संबद्धं शास्त्रकार्यांतरे स्थितं॥ आहुः प्रकरणं नाम ग्रंथभेदं विपश्चित इति॥ २॥ लक्षणकृतो
भेदः॥ ७॥ बालबोधनं चावांतरप्रयोजनं॥ ७॥ श्री॥ अथेदानीं चिकीर्षितं ग्रंथमारभमाणः प-
दार्थसामान्यं स्वरूपतो निर्दिशति प्रमितिविषयाः पदार्था इति। पदार्था इति सामान्योद्देशः
तेषां स्वरूपं प्रमितिविषया इति प्रमितिर्यथार्थज्ञानं तस्या विषयाः प्रमेया इत्यर्थः। प्रमेयत्वमेव पदा-
र्थशब्दस्य प्रवृत्तिनिमित्तमित्यपि अनेन दर्शितं ननु प्रमितिविषयत्वं पदार्थसामान्यलक्षणं केवलान्वयि-
त्वेन प्रमेयत्वस्य लक्षणबाधायोगात् केवलव्यतिरेकी हेतुविशेषो लक्षणमिति तल्लक्षणरहस्याभिधास्यमा-
नत्वात्। नन्वत्रापि चेमस्सैं विषयो व्याप्त्ययोरस्तीति चेन्न तस्यापि कदाचित्प्रमेयत्वाव्युक्तिर्वीरजनेनातादा

श्र ३

13

मि०

८ सै ३

न्यं वा क्रमविषयः रजतत्व संसर्गो वा ते सर्वे प्रमेया एव [illegible] इदानीं प्रमाविषया न भवंतीति चेत् तर्हि पदार्थो
नामपि स्मृतिविषयत्व समये अपदार्थत्वापत्तिः कदाचित्ते प्रमेया एवेति यदि तर्हि क्रमविषयोपि तथेति
तुल्यं। किंच पदार्थशब्दो योगिको वा रूढो वा आद्येपि क्रमविषयस्यापि पदार्थत्वात् तद्व्यावर्तनमयु
क्तं स्यात् लक्षणेन हि लक्ष्यादन्यद्व्यावर्तनेन तुल्यस्यमेव। क्रमविषयश्च पदार्थशब्दवाच्य वा ल्लु
८५ क्ष्येव न द्वितीयः रूढिहि सप्तपदार्थेष्वेव सेव क्रमस्यापि विषयः अन्यथा अन्यथाख्यात्यनुपपत्तेः
अन्यत्र सदेव अन्यत्र दोषाद्भातीति ह्यन्यथाख्यातिः। तथा च द्वितीयेपि पक्षे सप्तपदार्थेष्वेव क्रमविष
याद्भूतिमस्यापि लक्ष्यत्वाद्व्यावर्तनं सर्वेव ह्यर्थमेव प्रमेयत्वादिर्व्यतिरेकी धर्म इति वदतो विरोधिक
स्यापि सिद्धांतस्याकणादमुनेर्व्याख्यावसरमेव वाञ्छिधेयत्वादि धर्मः केवलान्वयीति सिद्धांत प्र
॥८॥ वादस्य प्रतीमानत्वात्। अत्र ग्रंथकार एव पदार्थसामान्यलक्षणं उक्तमिति वक्ष्यति अतस्त ॥८॥
द्विरोध इति चेन्न। तत्र हि तस्य गतिं वक्ष्यामः ननु क्रमस्यापि प्रमेयविषयत्वे कथं तस्य क्रमत्व
सिद्धिरिति चेत् शृणु। इदं च रजतत्वयोर्व्यधिकरणसंसर्गः इदं रजतमिति ज्ञानमाभाधिकरण्येन वि

यो१

14

ब९

थपीकरणान्नूनाधिकरणग्रकारत्वेन गमकत्वमिति तत्तत्स्वरूपकथनं प्रवृत्तिनिमित्तकथ
नं चेति सूक्तमिति। के ते पदार्थाः किंनामानः किंयन्त इति जिज्ञासायामाह ते चेति। ते पदार्थाः सप्तै
वेति संबंधः द्रव्यस्य सर्वपदार्थाधारत्वेन समवायिकारणत्वेन च प्राधान्यात् प्रथममुद्देशः। गुण
जातिरस्य सर्वद्रव्यवृत्तित्वात्तु-पत्कर्मणस्तदे गुणमेवोपन्नत्वेनातिसान्निध्यात् गुणस्य तदानंतर्यं। कर्मे
जातीयस्य तदुपरीत्याज्ञानाधारत्वाच्च तदानंतर्यं। सामान्यस्यानुवृत्तत्वेन त्रितयवृत्तित्वेन च बहुविषयत्वा। ब५
त्तदानंतर्यं। विशेषस्य समवेतत्वात् सामान्यप्रतियोगित्वाच्च तदानंतर्यं। एतेषां पंचानां संबंधत्वेन समवायस्य
तदानंतर्यं। [redacted] निषेधरूपत्वेनाभावस्य तदानंतर्यमित्युद्देशक्रमः। एवं च ते
रत्वाद्विवेचनीयं विस्तरस्त्वत्र नातिप्रयोजनत्वाच्च नोच्यत इति। एवकारोऽयोगान्ययोगव्यवच्छेदार्थः। अत्रैतावत्त्वस्य × स्त्ये८
वत्त्वं नाधिकमिति अयोगव्यवच्छेदः। अन्यस्यात्र संबंधो नास्तीत्यन्ययोगव्यवच्छेदः तथा च शंखः पां
डुर एवेतिवत् पदार्थाः सप्तैवेति वचनं व्यक्त्या संख्यायां विशेषणत्वेन विशेषणसंगत एवकारोऽयो
गं व्यवच्छिनत्ति यथा तु पार्थ एव धनुर्धर इति स सप्तैव पदार्था इति विशेष्यसंगत एवकारः त
तदन्ययोगं व्यवच्छिनत्ति इत्यन्ययोगव्यवच्छेदसिद्धिः यथास्थिते नैवकारेण भवति। एवं अग्रे

एव२

मि०

ध्येयकारोऽस्ति दृष्टव्योऽतो वेति चकाराज्जिज्ञासानिवृत्यर्थः। संख्या ह्याहो द्वित्वादिगुणसिद्धामेव सं
ख्यां स्पष्टयति द्रव्याणि परिसंख्येष्टेनैवेति। तत्र सप्तस्वप्येष्विष्यर्थः। गुणान्हित्वा तजत्वेषु गणत्वं
नैषु शुक्लः प्रदीपे रूपयावेन द्वेऽन्यत्र च नार्थः। गुणेष्वप्यपि संख्या नास्ति गुणेषु गुणानंगीकारा
द्वत्रवृत्तिरिति निश्चयफलं तथापि संख्यागुणयोरेकार्थसमवायसंबंधाद्गुणत्वेन तत्र संख्याव्यवहा
र इति न दोषः कर्मापि विशेषगुणत्वं हि स्यात्। कर्माणि इति। ननु संयोगविभागवेगपरंपराव्यतिरेके
नै५ टे९ ण कर्मैव न प्रत्यक्षमः इति चेन्न ह्ययं संस्कारोऽपरपराधो येन संबंधो न प्रत्यक्षोऽनीति निश्चलतीत्येवमाकारेण सं
×गो५ योगादिविलक्षणस्य चलनस्य जनीनत्वानुमानं वंदं प्रत्यक्षमिति चेन्न तत्रापि अनुमानवपवोनरं चलनं साक्षात्
नीत्यनुगतवानुगतमेव स्पंदनं मनोन्मनानांगमनेन तत्नीचान्नावधारणानुपपत्तेः। संख्यावोप
चारिकी उपचारः स्तु संख्याकर्मणोरेकद्रव्याश्रितत्वं एवमग्रेऽपि। सामान्यं त्रेधा विविनक्ति सामान्यं
॥ ऐ ॥ वेति। विशेषाणां विनाशाभावे हेतुमाह। विशेषास्त्विति। अनंता असंख्याताः नत्वहेतुः पावन्नित्यद्रव्य ॥ ऐ ॥
वृत्तित्वादिति। यावंति नित्यद्रव्याणि गगनादिपंचकं चतुर्विधाः परमाणवः तत्र वृत्तिविशेषाणां भावस्तत्वेन त
षौ

स्मान्नित्यद्रव्याणामसंख्यातत्वात्तदाश्रितानां विशेषाणामप्यनंतत्वमित्यर्थः । ननु नित्यद्रव्येषु किमिति वि
शेषा नाभ्युपेयन्ते । जन्यानां व्याहतिसंभवान्नाभ्युपगम इति चेन्न निर्विजातिगुणक्रियाणां नित्यद्रव्या
णामपि व्याहतिसंभवात्तत्रापि तदनभ्युपगमे [illegible] अथ द्व्यणुकेऽभ्युपेयन्ते तेन हि गुणोऽस्याभ्युपेयतामि
ति चेन्नैवं नित्यगुणादि[illegible]लपरमाण्वादिगताः स्वपादयत्ने [illegible]व्यावर्तकाः रूपत्वावान्तरशुक्लत्वसमवा
[illegible]यः संभवन्ति । अवान्तरजातीयव्यक्ति[illegible]विशेषाश्रितास्त्रयविशेषेण तद्व्यावृत्तिः संभवति पाकजानां कालादिशु
क्लयोः परस्परं शुक्लानां च मिथोभिन्नसंवेतरेतरं व्यावृत्तिर्विशेषपदार्थं विना योगिनां न संभवतीति परमा
णुष्वपि सत्ता[illegible]यत्वपृथिवीत्वादिव्यतिरिक्तावान्तरजातेरभावात्तेष्वपि समानजातिगुणकर्मसु मिथो
व्यावृत्तबुद्धेर्विशेषपदार्थं विनासंभवात्तत्रापि तत्सिद्धिः । कुतः परमाणुष्ववान्तरजातिरिति चेन्न द्व्य
णुपरमाणुवृत्तिजातेः स्वकार्यवृत्तित्वदर्शनात्पृथिवीत्वादिवत्तस्यापि जातेर्घटादावपि वर्तनेन तथा
त्वेनावान्तरजातित्वात्तस्मान्नित्यद्रव्येष्वेव विशेषपदार्थाङ्गीकारान्नान्यत्रानित्येष्विति साधूक्तम् । यावन्नित्य
द्रव्यवृत्तित्वादनन्ता एवेति । समवायस्य विभागाभावे हेतुमाह समवायस्त्वेक एवेति । इह तन्तुषु पटः इह पटे [illegible] इह द्रव्ये

। दि २

शुक्ल ४

श्रि०

× रू

वत्तनं दृढ पटे पट स्वन्यं तस्मान्निर्विशेष्याणामेसः रव्यातत्वं नत्वेदा प्रिंता विशेषा अपने तादृश्यर्थो । ननु नित्यगुणेषु क्रि
मिति विशेषा नान्यूपेयंते ॥ जंग्यान द्याहतिसंतेवान्नोन्यूपगमइतिचेत्रहंतेति । न हि जातिगुणक्रियाभिन्न
अङ्गव्याणामपि व्याहति संभवानृतत्रापेतदनभ्यूपगमौक्तेः ॥ अथ इयेतन्युपेयं तेन हि गुणेष्वभ्यूपेयतामिति
य न्नेव नित्यगुणादि कुल परमाण्वादयतानुरूपादयस्तेषां च व्यावर्तकाः रूपत्वावांतरशुक्लत्वमधुरत्वादयः संभ
वंति । अवांतरजातीयवक्तिष्वपि तित्वपाश्रितां अयतिरेकत्वं द्याहतिः संभवति गगनाकालदिक्तात्मयोश्च
परस्परं युक्तानामनां च मिथो मनसां चेतरेतरं व्याहतिर्विशेषपदार्थं विनायोगिनां न संभवति परमाणुष्वपि
सत्ताद्यवयवपृथिवीत्वादिव्यतिरिक्तावांतरजातेरभावात्तेष्वपि समानजातिगुणकर्मसु मिथो व्याहतेत्तत्
विशेषपदार्थं विनासंभवान्नत्रापि तत्सिद्धेः ॥ अतः परमाणुष्वनावांतरजातिरिति चेन्न
घटत्वं नं दृढ पट पटत्वमित्यादि द्रव्यगुणकर्मसामान्यप्रत्ययाः । विशेषणविशेष्यसंबंधनिमित्ताः अबा
॥१०॥ धितेह प्रत्ययत्वात् इह कुंडे बदरमस्तीति प्रत्ययवदि[illegible]नुमानेन [illegible]घवतर्कसनाथेन एक एव । ॥१०॥
सिद्ध्यति एकेनैव सर्वत्रेह्यव्यवहारोपपत्तौ तदनेककल्पनायां गौरवादिति समवाये कं च सि

ठ

द्भिः॥ अनावैविनडाते अभावस्थिति। इह घटो न विद्यते इत्यय प्रागभावः प्रतीयते स नष्ट
इति ध्वंसः घटः पटो न भवतीति अन्योन्याभावः प्रतियोगिसमवायिव्यतिरिक्तः इह घटो
नास्तीत्यादि प्रत्ययविषयस्त्रैकालिकोऽत्यंताभावः॥ संप्रति पृथिवीं पृथक् करोति पृथि
वीति। परमाणुसद्भावे प्रमाणं त्रसरेणुः सावयवः सावयवारब्धः॥ जन्यमहत्त्वाधिकर
णत्वात् घटवदिति। त्र्यणुकस्यावयवो द्व्यणुके सावयवे सति स एवावयवः परमाणु
स्तोपि वेद अनित्यः स्यात् तस्यापि हेतुपरंपरानुसारेण अनवस्था स्यात्। तथा चान्यू
धिकानेकावयवारब्धं सर्वं कार्यं तुल्यमिति॥ मशकमातंगयोरपि तुल्यपरिमाणत्वापत्तिः
तस्मात् सर्वकार्यद्रव्यारंभकत्वेन नित्यः परमाणुः सिद्ध्यतीति नित्यपृथिवीसिद्धिः द्व्यणु
कमध्यमेनैव सिद्ध्यति। एवमग्रेपि परमाणुसाधनं द्रष्टव्यं। अनित्यायास्त्रैविध्यमा

घ५

पंचसु २

द्रा। सापीति शरीरमिन्द्रियं विषयश्च रूपं स्वरूपं यस्याः सा तथा पार्थिवं शरीरा
दिचतुष्टयसिद्धौ प्रमाणमाह। शरीरमिति ॥७॥ ७॥ गंधव्यंजकपदेन प्रमाणं सू
चितं। घ्राणं पार्थिवं रूपादिषु मध्ये गंधस्यैवाभिव्यंजकत्वात्। वायूपनीतसुरभि
चंपकत्रागवदिति। घ्राणस्य पार्थिवत्वे। आपो विभागं प्रापयति। आपोपी
ति। वरुणलोक इति। आगमसिद्धमिति शेषः। रसव्यंजकमिति। रसनेन्द्रिय
स्याप्यत्वे मानं। रसनेन्द्रियं। आप्यं रूपादिषु मध्ये रसस्यैवाभिव्यंजकत्वात्। पंचसु ४
लालवदिति प्रयोगः। तेजो विसृजते। तेजोपीति। अत्रापि आदित्यलोक
॥११॥ इत्यनंतरं पुराणादिसिद्धमिति शेषः। इंद्रियमिति। तैजसं चक्षुः। रूपा ॥११॥
४ पंचसु दिषु मध्ये रूपस्यैवाभिव्यंजकत्वात्। आलोकवत्। मानो व्यावर्त्तनाय एव

॥ कारः ॥ असिद्धिवारणाय रूपादिष्विति। अन्यथा रूपत्वस्यापि व्यंजकत्वेनासि
द्धिः स्यात्। विषयस्य वातु विध्यमाह। विषय इति। ननु आकरजसुवर्णं। तद्व
पार्थिवं। नैमित्तिकद्रवत्वाधिकरणत्वात्। लोष्टादिवत्। पातिमगुणाधिकर
णत्वाद्वा। पीतपटवदिति। सुवर्णस्य पार्थिवत्वसिद्धेः कुतः तैजसत्वमिति चेत् मै
वं। तस्य पार्थिवत्वे अत्यंतानलसंयोगे सति द्रवत्वनाशापत्तेः। द्रवपार्थिवत्वेन
घृतवद्धीमानलेधनत्वापत्तेश्चेति बाधकतर्कपराहतमनुमानं। तैजसत्वेन
तर्कसहकृतमनुमानं। सुवर्णमपार्थिवं। असति प्रतिरोधिद्रवद्रव्यसंबंधे अत्यं
तानलसंयोगे सति अनुच्छिद्यमानद्रवत्वाधिकरणत्वात्। दाप्यपरमाणुवदिति।
पार्थिवव्यतिरेकसिद्धौ नैमित्तिकद्रवत्वेन जलव्यतिरेकसिद्धेः रूपत्वेन प
रिशेषात् तैजसत्वसिद्धिः॥ वायुं विनक्ति। वायुरपीति। वृद्धियमिति त्वगिंद्रि

21

पंसु १ ण।

मि०

राम

पं। वायवीयं। रूपादिषु मध्ये स्पर्शस्यैवाभिव्यंजकत्वात्। शरीरसंगिसलिल
शैत्याभिव्यंजकव्यजनवातवदिति॥ त्वगिंद्रियस्य वायवियत्वे मानं॥ कंपजनकेने
इत्यनेन वायोरतींद्रियत्वात्कंपस्पर्शाश्रयब[illegible]तिलिंगगम्यत्वं सूचयामास।
प्रयोगस्तु। प्रयत्नाद्यभावे सति शारीरकाकंपः। स्पर्शवद्द्रव्यजन्यः। कंपत्वात्॥
शारीरादिजन्यकंपवदिति। परिशेषाद्वायुसिद्धिः। शरीराभ्यंतरचारीश्वा
सोच्छ्वासरूपः। प्राणवदपानादीनामाधिक्यमाशंक्याह। स एवेति। प्राण एवम
पानसमानव्यानोदानसंज्ञां लभते इ सर्वः। ननु स्तिमितो वायुः पंचमोस्तीति
अत आह। स्तिमितेति। स्तिमितवायुः परमाणुसमूह इत्युक्ते पंचविधत्वकार्यत्वे
पिनदोषः॥ कार्यस्यापि परमाणुरूपत्वसंभवात्। परमाणूनामेव परंपर
याकार्यावयवत्वात्॥ अत आह। अनारब्धद्रव्येति। अनारब्धद्रव्यं येन स तथा

॥१२॥

22

यद्यपि स्तिमितवायोः परमाणुरूपत्वे व्यजनादिव्यापारानंतरं तदीयः स्पर्शो
न गृह्यते॥ परमाणुस्पर्शस्यातींद्रियत्वात्। तथापि तदीयस्पर्शानुपलंभेपि
व्यजनादिव्यापाररूपनिमित्तसहकारिलाभादारब्धकार्यस्य स्पर्शोप
लंभाददोषः। तस्मात्स्तिमितवायावेव तस्यांतर्भाव इति नाधिकत्वं॥ आका
शस्य स्वत एकत्वेपि औपाधिको विभागो भविष्यतीत्याशंक्य तदभावे
हेतुमाह॥ घटाकाशादीति उपाधीनामनंतत्वादौपाधिको विभागो
न संभवतीत्यर्थः॥ कालस्यौपाधिकं विभागमाह। उत्पत्तीति। पदार्थाना
मुत्पत्तिस्थितिविनाशैर्लक्ष्यते इति उत्पत्तिस्थितिविनाशलक्षणः। उत्प
न्नाऽविध्वस्तः स्थितो वर्त्तमानः। विनाशो नभूतकालो लक्ष्यत इति
त्रिविध इत्यर्थः॥ दिशामुपाधीनाह। [illegible]जन्यते दिगिति। सर्वत्र देवतार्थे
इदमर्थे वा तद्धितः। टिड्ढाणञित्यादिना ङीप्। अग्नेर्ढक्। यमाण्यदि

ति विशेषः। शौद्रीअंतरिक्षप्रदेशे। गगनादीनां स्वभावसेद्धाभावे हेतुमाह॥
आकाशादिति। आकाशं तावच्छब्दलिंगकं। शब्दाश्चसर्वे समानाधाराः॥
तथाहि॥ विवादाध्यासिताः शब्दाः। श्रूयमाणशब्दाधारसमवेताः। शब्द-
त्वात्। श्रूयमाणशब्दवत्। न चाश्रूयमाणशब्दत्वमुपाधिः॥ श्रूयमाणवि-
शेषणस्य साधनव्याप्तिपरिहारार्थत्वेन पक्षेतरत्वात्। श्रूयमाणशब्दा-
धारसमवेतसंयोगादौ साध्याव्यापकत्वात्। दिक्कालयोः परापरत्वाप-
रत्वानुमेयत्वेन सिद्धावेकत्वसिद्धिः। तथाहि। तरणिपरिस्पंदलक्षणो
होरात्रादिर्बहुकालाल्पत्वाभ्यांविशिष्टपिंडे परापरबुद्धिर्जन्यते। तरणि-
परिस्पंदस्य च सूर्यसमवेतत्वेन स्वतः पिंडसंबंधाभावात्। स्वयं स्वच-
मूर्त्तत्वेन आश्रयद्वारापि संबंधाभावात्। न च पृथिव्यादीनां तत्संबंध-
घटकता मूर्त्तत्वात्। आत्माकाशयोश्च विशेषगुणहेनघटादिवत्तदप-

क॰ व॰ ।१३।।

द्वत्वात्। नस्तरणिपरस्पंदपिंडसंबंधघटकतया सिद्धे यच्चापकं द्रव्यं स
एव कालः। पिंडस्य च तरणिपरिस्पंदेन संयुक्तसंयुक्तसमवायलक्षणः
संबंधः। दिगपि अनियतपरत्वापरत्वाभ्यां प्रमाद्विप्रकृष्टदेशावच्छिन्नपिं
डसमवेताभ्यां अनुमीयते। न चाहि। कालस्य ज्येष्ठत्वकनिष्ठत्वादिनियाम
परत्वापरत्वबुद्धिहेतुत्वेन सिद्धस्य अनियतपरापरबुद्धिहेतुत्वासंभ
वात्। तस्माच्चैकत्वेन सिद्धं यद्द्रव्यं सा दिक्। दिक्कालयोश्चैकत्वेनैव व्यव
हारोपपत्तौ कल्पते। न च व्यवहारभेदेन वस्तुनेकत्वकल्पनायां माना
भावात्। आत्मपदार्थं विभज्यते। आत्मेति। ननु अष्टद्रव्यातिरिक्त
आत्मपदार्थ एव नास्तीति कथमयं विभागः। न चाहि। कायाकारप
रिणतं पृथिव्यादिचतुष्टयमेवात्मपदार्थः। तत्रैव चैतन्यं। ननु यदि भू
तेषु चैतन्यं तर्हि घटादेरपि चैतन्ये नापत्तिरिति चेन्न। मदशक्तिव

25

मि०

स्वधिर

दविरोधात् यथाम्रमुकफले वर्णपर्णेषु प्रत्येकं मदजनकाभावेपि स
मुदायेन तज्जनकत्वं प्रत्यक्षम्॥ च यथाकारे तदभावेपि शरीराकारपरि
णते भूतचतुष्टये चैतन्योपपत्तेः॥ प्रमाणं च अहं स्थूलः कृशो गौरः इति शरीरस्य
मानाधिकरण्यं प्रत्यक्षमेव। ततः पृथिव्याद्यंतभावादात्मपदार्थस्य अतिरिक्त
विभागो न युक्त इति चेन्न। तदसारं। शरीरस्यात्मत्वे बाल्ये दृष्टं। कौमारादौ
न स्मरेत्। बाल्यकौमारादिशरीराणाम् यावद्द्रव्यभावित्वेन परिमाण
भेदेन भेदात्॥ अन्यानुभूतस्यान्येनास्मरणात्॥ नहि चैत्रेणानुभूतं मैत्रः॥
स्मरति। तदुक्तं मुदयनाचार्यैः नान्यदृष्टं स्मरत्यन्यो नैकं भूतमपक्रमात् ॥
वासनासंक्रमो नास्ति नच गत्यंतरं स्थिरं इति अपक्रमो विनाशः। वासना
संस्कारः॥ किंच शरीरं नात्मा। रूपादिमत्वात्। घटवत्। नच चेतनत्वमुपाधिः।
रूपादिमत्वेनैव शरीरशरीरस्याप्यचेतनत्वेन उपाधेः साधनव्यापकत्वात्॥
हेतोरनुकूलस्तर्कस्तु उक्त एव। बाल्ये दृष्टमित्यादिना। सामानाधिकरण्ये ॥१०४॥

प्रत्ययश्चश्चोतः। यौक्तिकबाधसद्भावानुमकुरारमितिभेदप्रत्ययाच्चात्मा
न्नशरीरं। आत्मा। तथाप्यतिरिक्तात्मसद्भावे किं मानमिति चेन्नु। एवंस्ताव
दुक्तएवपरिशेषः॥ अपरंवानुमानं। इच्छा क्वचिदा[redacted]ता। गुणत्वानु॥
जन्य४ रूपवत्। इच्छा गुणः विशेषगुणः इति वा। अनित्यत्वे सत्येकैकेन्द्रियग्राह्य[illegible]त्नुरूपवनु।
त्नेन्येच्छायाः पक्षीकृतत्वात्नुनेश्वरेच्छायांभागासिद्धिः। आत्मानो नित्यत्वात्नुप्रभा
याश्च गुणत्वान्नविचारः। उत्पत्तेर्वा अयावल्लुषप्रत्यक्षविषयत्वादिति विशेष्यं
कर्तव्यं। रसवदिति द्रष्टव्यं। स्यान्नुनभूतं पवकगुणो। नापि दिक्कालमन
गुणः४ सां मनसैवग्राह्यत्वाद्। विशेषगुणत्वाद्दृष्टतरं चहेतुः। एवमितरबाधस
हकृतेन सामान्यतोदृष्टेन व्यतिरिक्तात्मसिद्धिः। यद्वेतरबाधप्रदर्शना
नंतरं। इच्छा। अष्टद्रव्यातिरिक्तद्रव्याश्रिता। अष्टद्रव्यानाश्रितत्वे सति गुणत्वा
यन्नैवं तन्नैवं। यथारूपादिति। व्यतिरेकिणात्मसिद्धिरिति। पुक्तएवतस्य विभा
गः। तेच ज्ञानां विभागाकरणे हेतुमाह॥ अनेनाएवेति। मनसोविभागाकरणं
मनो विषयत्वानु६

27

मि०

हेतुमाह॥ प्रत्यात्मेति। आत्मनां प्रतिशरीरं भिन्नत्वेनानंतत्वात्त[illegible]न्निष्ठमनोप्यनंत
मित्यर्थः॥ ननु मनसः सर्वदा स्पर्शरहितद्रव्यत्वेन विभुत्वालथमात्मनिष्ठ
त्वमितिचेन्न। युगपज्ज्ञानानुत्पत्तिलिंगेन धर्मिग्राहकेमनेनाणुत्वसिद्धेः॥ न
वानामप्यपरं विभागमाह। आकाशादीति। नित्यानित्यमिति॥ परमाणुका
र्यभेदादित्यर्थः॥ रूपादिनामवांतरविभागदर्शयति॥ रूपमिति। सितादीनां
आश्रयव्याप्यवृत्तित्वेनाव्याप्यवृत्तित्वायोगात्। चित्रः पट इत्याद्यनुभवाच्च
सप्तमरूपमास्थेयमिति मतमाह। चित्रभेदादिति। तत्रापि जले शुक्लमेव रूपं।
शुक्लभास्वरमेव तेजसि इतराणि भूमावेव। पाकजानि। रसोपीति। मधुरः।
शर्करादौ। तिक्तो निंबादौ। कटुर्मरीच्यादौ। कषाय आमलक्यादौ। आम्ल आ
म्रादौ। लवणः प्रसिद्धः। षड्रसा हरीतकी चित्ररसानुभवमवलंब्याह।।
चित्रभेदादिति। तत्रापि जले मधुर एव रसो हरीतक्याघजिव्यं गंधोऽपाक ॥१५॥

28

जः।इतरेतुभस्मावेवपाकजाः।सुरभिश्चंदनादौ॥असुरभिर्मद्यादौ।शीतस्प
र्शोजले।उष्णस्तेजसि।अनुष्णाशीतोवायौ।भूमौसएवपाकजः।अणुत्वव
ह्रस्वत्वेवपरमाणुद्व्यणुकयोः।महत्वदीर्घत्वेओकाशघटादौ।कुवलयामल
कादौअणुह्रस्वादिव्यवहारोगौणः।पृथक्त्वमिति।अनेकवृत्तिर्द्वित्वपृथक्त्वादि॥
संयोगेति।स्थाणुश्येनयोरन्यतरकर्मजः।मल्लमेषयोरुभयकर्मजः।तंतुवे
मासंयोगात्पटवेमासंयोगः।संयोगजः।तथाहि।पटारंभकतंतुवेमासंयोगः
कर्मजः।ततःपटोत्पत्तौवेमापटसंयोगोनकर्मजः।उभयत्राप्यन्यत्रवाकर्मा
भावात्।किंतुतंतुवेमायोःसंयोगएवहेतुः।विभागोऽपिसंयोगवत्ज्ञेयः।
वृद्धतरुणयोःपरत्वापरत्वेकालकृते।सन्निकृष्टेअपरत्वंविप्रकृष्टेपरत्वंच
दिक्कृते।तयोर्दिक्कालजन्यत्वंपुरस्तादेवप्रसाधि।परत्वापरत्वनिमित्तका
रणत्वेनैवतयोःसिद्धत्वात्।बहुतरतपनपरिस्पंदाल्पतरतपनपरिस्पंदयोः
पिंडेसंसर्गात्मकःकालस्तस्यविभुत्वेनोऽन्यसंबद्धत्वात्।बहुल्पतपनपरि

स्पंदयोरेव पिंडसंबद्धत्वात्परत्वापरत्वविशिष्टबुद्धिजनकत्वात्तन्निमित्तत्वेन काल
सिद्धिः। संनिकृष्टविप्रकृष्टयोर्देशयोर्दिग्रूपत्वेन दिशोपि प्रमाणं संयुक्तसंयो
गवत्त्वात्तत्वद्वारोपपरत्वापरत्वविशिष्टबुद्धिजनकत्वात्तन्निमित्तत्वेन त
सिद्धिः। परत्वापरत्वयोः सिद्धे द्वैविध्ये। बुद्धिभेदानाह। बुद्धिरूपेति। प्रमा निरू
प्यत्वामरस्तादिजन्यत्वमप्यप्रमां स्वीकर्तृहन्यायेन प्राग्विरज्यते। अप्रमा
पीति॥ ननु सर्वज्ञानानां यथार्थत्वात्संशयविपर्ययाभावात्कथं न द्विजाग
इति प्राभाकराः। मानं वा ज्ञानत्वेन यथार्थमात्रवृत्ति। ज्ञानमात्रवृत्तिधर्म
त्वात्॥ प्रमात्ववदिति॥ ननु तार्किकमते ज्ञानस्वरूपेण यथार्थत्वं वर्तत एवेति
सिद्धसाधनतां प्रमात्वे परिहरति। यथार्थत्वमिति। यथार्थत्वं तद्वति त
त्प्रकारकज्ञानत्वं। तच्छब्देन ज्ञानविषयवृत्तिघटत्वादिकमुच्यते। तेन घट
त्ववति घटे घटत्वप्रकारकज्ञानत्वं यथार्थमित्यर्थः। भ्रमे तु नैवं पुरोवर्ति
नि शुक्तिकाशकले रजतत्वस्याभावेन रजतत्ववति रजतत्वप्रकारकत्वं॥ ॥११९॥

किंतु रजतत्वाभाववति शुक्तिकाशकले रजतत्वप्रकारकत्वे। ततो यथार्थत्वल १२
क्षणं नेवदन्नुपेयं॥ भ्रमेन व्याप्नोति हेतौनुप्रमेयत्वादिव्यभिचावारणाय
मात्रमदं॥ तस्मादयुक्तो विभाग इति चेत्। उच्यते। प्रत्यक्षविरुद्धेतावदनु
म४ मानं। अहमत्र संशये मा च संशयः। समजानि। इति संशयानुभवात्॥ त
था शुक्तिका। मेमामहमेतावंतं कालं रजतमित्यभिज्ञासिषमिति विपर्यानु र्य
भवात्। तथा च कालात्ययापदिष्टमनुमानं। तथाप्ययथार्थसज्ञावेद्वि प्र
माणमिति चेत्। एवं तावद्दर्शितमेव प्रत्यक्षं अपरमनुमानं। ज्ञानत्वं अयथा
र्थवृत्ति सकलज्ञानवृत्तित्वात्। सत्तावदिति न च साध्यवैकल्यं दृष्टांतस्य अय
थार्थव्यवहारे हरुमते पि सत्तासद्भावेन संप्रतिपन्नत्वात्। साध्यस्य न चानु

न्वत्वादौ व्यभिचारः। तेषां स्वकल्पे ज्ञानवृत्तित्वाभावात्। नवज्ञानान्यवृत्तित्वं उ
पाधिः। स्मृतेरयथार्थाया अपि सद्भावेन स्मृतित्वस्यायथार्थवृत्तित्वेऽपि ज्ञाना
न्यवृत्तित्वाभावेन साध्याव्यापकत्वात्। तस्मादयथार्थज्ञानसत्वात् पुरुषोऽयम
× मा४ प्रमाविभागः। प्रमो[illegible]भजते। प्रमेति। स च विधं ईश्वरभेदेनेति वक्ष्यति। लिंगस्य
त्रैविध्यमाह। केवलान्वयीति॥ क्रमेणोदाहरणानि। शब्दोऽभिधेयः प्रमेयत्वात्।
घटवत्। जीवच्छरीरं सात्मकं प्राणादिमत्वात्। न यदेवं न तदेवं यथा पाषाणादि
ति। अनित्यः शब्दः। कार्यत्वात्। यत्कार्यं तदनित्यं यथा घटः। यदनित्यं न भव
ति तत्कार्यमपि न भवति। त्रिविधस्यापि द्वैविध्यमाह। तदपि [redacted] ति॥ यत्र स्वय
मेव लिंगं दृष्ट्वा लिंगिनं जानाति तत्स्वार्थं। यत्र स्वयं निश्चित्य परबोध
नाय पंचावयववाक्यप्रयोगस्तत्परार्थं। पंचावयवानाह। परार्थांगा
नीति। क्रमेणोदाहरणानि। पर्वतो वह्निमान्। धूमवत्वात्। महानसवत्
॥७॥

व्या२

तवार्यंधू[illegible]मवान् तस्माद्वह्निमानेव। स्वार्थं परार्थं गा। त्या। हा। उन्नयांगानी
ति। पक्षे व्याप्य वर्त्तमानत्वं पक्षधर्मत्वं सपक्षे व्याप्यैकदेशे वा सत्त्वं विपक्षे
सर्वस्मिन्नवर्त्तमानत्वं विपक्षाद्व्यावृत्तिः पक्षे साध्यस्य प्रमाणान्तरेण बा
धविरहः अबाधितविषयत्वं असन् प्रतिपक्षो यस्य तस्य भावस्सत्त्वं पक्षेसा
ध्याभावसाधकं प्रत्यनुमानरहितत्वमिति यावत्। अनुमानपरिशोधना
हेत्वाभ याह। तद्दोषा आसाइति॥ व्याप्तिपक्षधर्मताविशिष्टो हेतुः सिद्धः तद्रहितो असि
त्रिविध: द्धः स च पक्षाभावादाश्रयासिद्धः पक्षधर्मताभावात् स्वरूपासिद्धः। व्याप्यत्वा
वाद्व्याप्यत्वासिद्धः इति त्रिधा क्रमेणोदाहरणानि। गगनारविंदं सुरभि। अ
रविंदत्वात् सरोजारविंदवत्। अनित्यः शब्दः चाक्षुषत्वात् पटवत्। विमतं
क्षणिकं प्रमेयत्वादिति॥ साध्ये साधनाप्रयुक्तो हेतुः यादितद्विपरीतं साध
यति न विरुद्धः यथा शब्दो नित्यः कृतकत्वादिति अनुगतादिव्य समाप्ति

33

चार

ध्यन्नीति शब्दो निश्चयवाची एकेनसाध्यरूपेणेति सहचारो निश्चयो न विद्यते यस्या
सावनैकांतिकः ।। स च त्रिविधः ।। यथानित्यः शब्दः प्रमेयत्वादिति साधारणानैकां
तिकः ।। नित्या पृथिवी गंधवत्वादित्यसाधारणानैकांतिकः ।। सपक्षविपक्षव्यावृत्त
त्वात् ।। सर्वमनित्यं प्रमेयत्वादित्यनुपसंहारी । व्याप्त्युपसंहारस्थलाभावात् । तत्र
षड्हेत्वाभासपक्षे साधारणएवानध्यवसितशब्देनोच्यते । साध्याध्यवसायो नाय
निश्चया [illegible] पन्नात्तमित्यनध्यवसितत्व ।। स च षड्हेत्वाभासानभ्युपगच्छता वार्ये
।। पञ्चसु गुरुः ।। उदाहरणं तु पृथिवी नित्या गंधवत्वात् । अत्र सपक्षादाकाशादेर्विप
क्षात् जलादेर्व्यावृत्तेन साध्यस्य निश्चये तु मराकयत्वादनध्यवसितउच्यते ।। कालात्य ।
यये ऽपगमे ऽपदिष्टो निर्दिष्टः कालात्ययापदिष्टः ।। यथाऽनुष्णं तेजो ।। वस्तुत्वाज्जलव
दिति ।। प्रयोगेवस्तुत्वात् हेतव्यो व्याप्तिग्रहणसमये एव प्रत्यक्षेणानुष्णत्वप्रतियोगि ६३
नयोस्तत्वं क्वचिदवधारणीयं प्रतियोगिनिरूपणं विना नाभावनिरूपणसंभवात्
तथाच बलवता व्याप्तिग्राहिणैव प्रमाणेनैव तेजस्युष्णत्वमवधारितं तस्याप्यनि ॥१८॥

ष्टत्वासंभवात् । तथाच प्रत्यक्षेण तद्विपरीतनिश्चये सति तद्विरोधेनानुमानकाल
स्यात्यये प्रयुक्तत्वादस्य कालात्ययापदिष्टत्वं ॥ नन्वयमाश्रयासिद्ध एव तेजसः सा
ध्याभाववत्वेन निश्चितत्वात् संदिग्धसाध्यान्वितपक्षत्वासंभवात् पक्षस्यैव
विपक्षत्वेन अनैकांतिक एव । अतो नायं बाधितापरपर्यायः कालात्ययापदि
ष्ट इति चेत् । सत्यं । तथापि पक्षे साध्याभाव[illegible]मामंतरेणासिद्ध्यादेरनवगमात्
साध्याभावे प्रमारूपाबाधस्यैवोपजीव्यत्वात् पृथक्त्वं । तथापि असंकीर्णोदा
हरणं किमिति चेन्नु शृण्वतां । अयं पर्वतो वह्निमान् धूमवत्वात् इत्येतदनुमा
ने । अत्र महानसीयादिवह्निः पर्वते बाधादेव न सिध्यति (बाधकालात्ययाप)
असिद्ध्यादेस्तत्राभावात् । अतोन्यदीयो वह्निरन्यत्र साध्यमानः कालात्ययाप
दिष्टत्वादेव न सिध्यति बाधकालात्ययापदिष्टयोः पर्यायत्वे च प्रमितसाध्या
भाववत्तया प्रमिते पक्षे तु अनयोः प्रयोगात् । प्रकरणयोः प्रस्तुतयोः साध्यतदभाव
योः समः प्रकरणसमः । साध्यविरोधित्वेन तदभावस्यापि प्रसक्तत्वात् । उदाह
रणं तु । अनित्यः शब्दः पक्षसपक्षयोरन्यतरत्वात् । नित्यः शब्दः पक्ष

स्वपक्षयोरन्यतरत्वात् ननु व्याप्यारोपे व्यापकारोपस्तर्कः। यथा धूमानुमाने
सधूमोस्तु वह्निर्मास्तु इति वह्न्यभावस्य व्याप्यस्य प्रतिवादिनारोपे कृते यद्यन
ग्निः स्यात्तर्हि निर्धूमोपि स्यादिति धूमाभावस्य व्यापकस्यारोपः स च किमिति
नोद्दिष्टः तथा स्वप्नज्ञानमप्यनुद्दिष्टं मनोजन्यज्ञानं स च कुतो नोद्दिष्ट इत्यत
आह। तर्केति। तर्कस्वाप्नयोः संशय एव यद्यन्तर्भावस्तर्हि कथमिदमत्र पक्षाग्निमि
तत्वेनाग्निमत्वे धूमवत्वे संभवति तदपि प्रतीयते। अग्निरस्ति। नास्तीति कोटिद्वय
विषयत्वात्। यद्यदृश्यते च धूमस्तस्मादग्निरप्यस्त्येवेति विपर्ययपर्यवसानी
तर्कः तत्र न स्यादस्तीति वह्नितकोटिद्वयविषयत्वस्य सत्वात् स्वप्नस्तु गग
नमहत्वादिषु विद्यमानेऽविद्यमानत्वेनासंनिहिते गजादिसन्निहितत्वेन द
र्शयन् विपर्ययत्वलक्षणत्वात्। नन्वयं घट इति विशिष्टं सविकल्पकं ज्ञानं प्र
थमाद्धे संनिपातजं ज्ञानं निर्विकल्पकं तदेतद्द्वयं कुतो नोद्दिष्टमित्यत आह।
सविकल्पकेति। रजत एवेदं रजतमिति सविकल्पकं प्रमा। अरजते रजतज्ञा ॥२७॥

नमप्रमा इत्यर्थः॥ निर्विकल्पकं नु प्रमायामेवांतर्भवतु॥ तस्य प्रथमाक्षसन्निपा
तजस्य वस्तुस्वरूपमात्रविषयकस्याप्यबाधात्॥ सर्वं ज्ञानं धर्मिण्यभ्रांतं प्रका
रे तु विपर्यय इति न्यायात्॥ निर्विकल्पकस्य तु प्रकाराभावात्॥ ननु सोऽयं देवदत्त इत्य
तीतवर्तमानादेशकालविशिष्टविषयं ज्ञानं प्रत्यभिज्ञा॥ दृष्टे वस्तुनि इदं ग्राह्यमि
ति ज्ञानमुपादानबुद्धिः अनिष्टे त्याज्यमिति हेयबुद्धिः॥ न तूभयरहिते उपेक्षाबुद्धिः
एतच्चतुष्टयं कुतो नेष्टमित्यत आह॥ एवमिति॥ प्रमायाम् अप्रमायां वांतर्भाव इत्ये
वंशब्दार्थः॥ असंदिग्धमेवमित्यन्वयः॥ बाधितानामप्रमायाम् अबाधितानां प्र
मायामिति विभागः॥ ननु तथापि विप्रकृष्टस्थालीप्रदेशे पुरुषेणानेन भवितव्यमि
त्यूह्यज्ञानं किंसंज्ञकोऽयं वृक्ष इत्यनध्यवसायज्ञानं॥ अनयोः कुतो नोद्देश
इत्यत आह॥ ऊहेति॥ अंतर्भाव इति शेषः॥ ऊहस्य पुरुषेणानेन भवितव्यमित्यनेन न भ
वितव्यमित्यपि स्फुरतीति संशयत्वं व्यक्तमेव॥ किंसंज्ञकोऽयमित्यत्रापि कुतः पन
सो वेति विकल्पस्फुरणादध्यवसायोऽपि संशय एवेत्यर्थः॥ ननु तर्कादीनां संश

37

मि०

४थर

येन गीवस्याहितत्वस्पणेनैव तेषां लक्षितत्वान्न पृथक्लक्षणाभिधाने
अंतर्भाववनीयेन क्वचिदित्यानायतत्क्षणकर्णे चेन्न । पुनादेरपि तदाख्यानाद्दू
रतिन्या[illegible]यो मुख्य इति चेन्न । नाकुनादेः स्पष्टत्वेन लक्षणमभिधानात्तद्वि
परीतत्वेनान्येषां तदभिधानादिति ॥ क्रमप्राप्तं सुखं विभजते सुखमिति । ऐहिक
पारलौकिकं चेति द्विविधमित्यर्थः ॥ सांसारिकशब्देन दुःखमिश्रितत्वोक्त्या दु
खस्य सर्वस्यापि सांसारिकत्वान्न भेदकथनं । मात्रेण साकल्यमुच्यते । दुःखा
दुषयोः सुखदुःखविषयविषयिवर्तं । स्वर्कुवंदनाहिकं टकादिविषयत्वे
वेनाविषयत्वाविहितमग्निहोत्रादिकं निषिद्धं कलिञ्जभक्षणादि दासी
नं लौकिकभोजनादि । एतानि विषयो यस्य स तथा सः चेत्यर्थः समाहर
स्य रूपमिव रूपमस्य तत्तथा एकैकमाधायेत्यर्थः तत्त्वमाधस्य गुरुत्वा
धिकृतादर्शनात् । ततः समाहाररूपं गुरुत्वमौपाधिकमित्यर्थः । ननु गुरुत्वमे
कमनेकवृत्तिकं समाहारमात्रावृत्तिकोपपन्नेः । नव्यास्त्वपवर्जितं वोगीकारः ॥२०॥

38

एकावयवनिष्ठं एकद्रव्यनिष्ठं अवयवविपदेन द्रव्यत्वस्याविवक्षितत्वात् अन्त्या
वयवपरमाणुगुरुत्वसंग्रहो न स्यादिति। तच्चैकद्रव्यनिष्ठं गुरुत्वं द्व्यणुकमने
केषां समाहाराद्गुरुत्वमपि समाहृतं। द्रव्यपतोद्भवत्वे सांसिद्धिकं स्वभावसि
द्धद्रव्योत्पत्तिसमानंतरमेवोत्पन्नमिति यावत्। तच्च जलनिष्ठं। नैमित्तिकमग्नि
संयोगाद्युपमानं घृतादिपार्थिवनिष्ठं सुवर्णादितेजोनिष्ठं च। स्वाभावि
कं जले औपाधिकं सैलादौ जलसंबंधेन तत्र तत्प्रतीयमानत्वात्॥ वेगः स्वारो
दौ॥ भावनानुभवजन्या स्मृतिजनकात्मनिष्ठा। स्थितस्य पूर्ववद्विधमानस्या
वस्थाविशेषस्य स्थापकः पत्राकटादौ वेष्टनक्रियादिजनकः। यदिष्टे पुरु
षं प्रवर्त्तयति स प्रवर्त्तकः। अनिष्टाद्धि निवर्त्तयति स निवर्त्तकः। फलमव्यस्मान
मंतो यस्य स तथा। अदृष्टं प्रायश्चित्तस्य कर्मणो भोगादेव क्षयात्। नमस्कारेण
मंगलवमुख्यात्तेन [illegible] प्रतिबंधकदुरितरूपाधर्मनाशात्। आदिपदात्प्रायश्चि
त्तादिग्रहः तेन हतं प्रायश्चित्तेन ब्रह्महत्यादिरधर्मो नश्यति। वर्णात्मको गकारादिर

39

श्रीं

वर्णात्मको मृदंगध्वन्यादिः॥ गुणाना[illegible]मनित्यत्वरूपेण परं विभागमाह॥ अत्रेति॥ अन्य इति रूपरसस्पर्शसंख्यैकत्वपरिमाणैकत्वैकपृथक्त्वगुरुत्वद्रवत्वस्नेहाः परमाणुगता नित्याः कार्यगता अनित्याः बुद्धीच्छाप्रयत्नाः ईश्वरगता नित्याः क्षेत्रज्ञगता अनित्या इत्यर्थः॥ प्रकारान्तरेण तेषां विभागमाह॥ संयोगेति॥ उभयरूपा इति ईश्वरे व्यापकाः अनीश्वरात्मन्यव्यापका इत्यर्थः॥ अन्ये रूपादयः आश्रयव्यापकाः स्वाधारमभिव्याप्य वर्त्तंत इत्यर्थः॥ विहितान्यक्षेपना[illegible]दीनि अर्घ्यप्रक्षेपादीनि निषिद्धानि मूत्रक्षेपादीनि उदासीनानि ग्रावक्षेपादीनि। सामान्यस्यानुक्तं विभागमाह। सामान्यमिति। तत्र सत्ता जातिः परैव व्यापकत्वात् द्रव्यादीनि घटत्वाद्यपेक्षयापराणि गुणत्वादीनि नीलत्वाद्यपेक्षयापराणि॥ कर्मत्वादीनि स्वावान्तरजात्यपेक्षयापराणि। सत्तापेक्षया तान्यपराणि। गुणत्वादीनि परापररूपाणि घटत्वादीन्यपराण्येव। अतः सत्तादीनि जातिरूपाणीत्यर्थः॥ कर्मत्वादीत्यादिपदात् पृथिवीत्वादिगृह्यते। पाकादिक्रियासंबंधाभावकत्वमौपाधिकमित्यर्थः॥ प्रागभावादीनां विभागानंत्ये हेतुमाह प्रतियोगीति। प्रतियोगिनामनंतत्वात्प्रागभावादयोऽप्यनंता इत्यर्थः॥ ननु मध्यत्वं नाम पदार्थान्तरं कुतो नोद्दिष्टमित्यत ॥२९॥

आहा। मध्यत्वमिति॥ सन्निकृष्टत्वविप्रकृष्टत्वयोः परापरबुद्धिकारणयोरभावे मध्यत्वबुद्धेरुपमानत्वात् मस्याभावे तमोवदस्य र्थः। नव्यं धकारः पदार्थांतरं वरीवर्ति॥ स न तावद्गुणादिषट्कं रूपवत्वात् क्रियावत्वाच्च। गुणादीनां तदभावात्। तदुक्तं प्रशस्तपादभाष्ये। गुणादीनां निर्गुणत्वनिःक्रियत्वे इति। नाप्याकाशादिपंचकं तत एव। मनोव्यावृत्तमूर्तरूपवत्वादिति॥ नापि पृथिव्यादिचतुष्टये स्पर्शरहितत्वात्। न चानुद्भूतस्पर्शः कल्प्यः कल्पकाँ वैं भावात्॥ नच रूपत्वमेव कल्प्यं। रूपवतः पृथिव्यादिना [redacted] तीयस्य काप्युद्भूतस्पर्शवत्वनियमात्। पं तमसि चक्कापि स्पर्शानुभवाभावात्। अनुद्भूतस्य स्पर्शस्यानुद्भूतत्वकल्पनायोगात् तस्माद्दशमं द्रव्यं अंधकारः। कुतो नोद्दिष्टमित्यत आह। अंधकारोपीति॥ अयमाशयः यद्यंधकारभावरूपः स्यात् तदालोकनिरपेक्षचक्षुर्ग्राह्यो न स्यात्। न च तेजस्यसे आलोंतरानपेक्षत्वेपि चाक्षुषत्वात् तत्र व्यभिचारः। तत्राप्यवयवविग्रहे चाक्षुषः तदवयवापेक्षणात्। स्य एवकैतदभाव इति चेत् न। तच्चापि आलोंतरसौरकिरणापेक्षणात्। अतो यश्चाचाक्षुषो भावरूपः स आलोकनिरपेक्षचक्षुर्ग्राह्यो न भवतीति यथा घटादि यथा गगनादीति

।मे०

आपाद्यापादकयोर्व्याप्तिर्गगनादावपि चक्षुर्ग्राह्यत्वाभावाद्विशिष्टाभावोपस्नेय घटवाच्चक्षुषो
भावरूपस्यादित्यापादके कर्त्तव्ये। तदा घटादिरेव दृष्टान्तः। तस्मादालोकाभाववत्त्वं घटादौ
प्रमाणं तु अंधकारोऽभावः। आलोकनिरपेक्षचक्षुर्ग्राह्यत्वात् आलोकाभाववानं। ननु अभा
वत्वेऽपि घटाभाववदालोकनिरपेक्षचक्षुर्ग्राह्यत्वं न स्यात् इति चेन्न। अभावग्रहे प्र
तियोगिसत्त्वस्यानपेक्षितत्वात् प्रत्यक्षप्रतियोगिसन्निहितदभावे [illegible] ग्रह एव तत्र तस्योनु।
न हि घटे सन्निहितदभावो गृह्यते। अत आलोकस्यांधकारप्रतियोगि[illegible]त्वात्तदभावेऽपि तम
सश्चाक्षुषत्वेन दोषाय। रूपं तु इन्द्रनीलादिगतं स्पर्शमाणमारोप्यते शुक्लाभाव आरो
पेस्वादृश्यं। क्रियावदीपादिगतागृह्यमाणारोप्यते। अतस्ताभ्यां न द्रव्यत्वसिद्धिरिति न
तुच्छा किं पदार्थान्तरं। तत्र प्रमाणं। अयं वह्निः दाहानुकूलातीन्द्रियादिविशिष्टधर्मसमवायी।
दाहजनकत्वात् यदेवं तदेवं यथात्मादि। न च सा व्याप्तिवैकल्यं दृष्टान्तस्य एवंविधस्यादृ
ष्टस्य तत्र समवायात्॥ सिद्धे तत्कापकोष्ठस्य शरीरात्मादिसंयोगैः सिद्धसाधनतावारणाय
दाहानुकूलेत्यादिविशेषणं। अतीन्द्रियप्रतिबंधकाभावे न सिद्धसाधनतावारणाय
समवायीति। एवं मनसि द्राशाति। कुतो नोद्दिष्टत्वात आह। याज्ञेरिति॥ वाय्वादिकारण ॥२२

नाम्न१ न्व१ ल१

स्वरूपमेव न पदार्थान्तरमित्यर्थः ॥ अनुमाने[illegible]वमुपाधिः ॥ ज[illegible] घटंभूतलमिति विशिष्ट
ज्ञानं विशेषणविशेष्यसंबंधजन्यं विशिष्टज्ञानत्वात् दंडीतिज्ञानवदिति परिशेषात्स
बंधत्वेन वैशिष्ट्यसिद्धिः ॥ तत्कुतो नोक्तमित्यत आह । विशिष्टमिति । घटंभूतलमिति
त्रापि स्वरूपसंबंधस्य विद्यमानत्वात्तेनैव सिद्धसाधनमनुमानमित्यर्थः ॥ तत्रापि संबं
ध एव विशिष्टबुद्धिहेतुः ननु विशेषणादयः सर्वेपि तथा सति प्रत्येकं विशिष्टबुद्धिप्र
संगात् इति । ननु ज्ञातो घट इत्यादौ ज्ञानजन्यं घटादिविषयनिष्ठं ज्ञातताख्यं पदार्थान्त
रमस्तीति तद्रूव्यमित्यत आह ॥ ज्ञाततेति । ज्ञानविषययोः संबंध एव ज्ञातता न तदति
रिक्ते मानाभावादित्यर्थः ॥ ननु गोसदृशो गवय इत्यादौ सादृश्यं पदार्थान्तरमस्ति
तदुद्दिष्टव्यमित्यत आह । सादृश्यमिति ॥ गोसादृश्यं गोगतशृंगत्वादि गवयगतं तदौ
पाधिकं सामान्यं तदुद्दिष्टमित्यर्थः ॥ लघुत्वं पदार्थान्तरं कुतो नोद्दिष्टमित्यत आह ॥ लघु
त्वमिति ॥ नन्वन्ये प्रमादयः पदार्थाः संति ते कुतो नोद्दिष्टा इत्यत आह । एवमिति ॥ तेषामपि
बुद्ध्यादौ यथायथमन्तर्भाव नाधिक्यमित्यर्थः । नन्वेवमेतन्मतेऽपसिद्धांत इत्याशंक्य
सूत्रकृतापि संमत इत्याह ॥ पथेति ॥ गुणगणनायां रूपरसगंधस्पर्शसंख्यापरिमाण

१५५

मि०

नाति। संख्यायां गुणेन्तर्भावमुक्तः। तद्वदपरेषामपीत्यर्थः॥ कारणत्वकार्यत्वाभ्यां विभागोत
रमाह। एतेषामिति। नित्यानामाकाशादीनां अनित्यानां घटपटादीनां। कारणं विभजते॥
तच्चेति। तच्च कारणं त्रिविधं त्रिप्रकारमित्यर्थः। समवायिकारणं तंत्वादि। असमवायि
कारणं तन्तुसंयोगादि। निमित्तं कुविंदादि। ननु मनसा सह पृथिव्यादिचतुष्टयं मूर्त्तं अन्य
त्सर्वं अमूर्त्तं तेषामेव पंचानां क्रियावत्त्वं अन्येषां निःक्रियत्वमित्यादयो भेदाः कथं नोक्ता॥
इत्यत आह। अपर इति। एवं द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साध
र्म्यवैधर्म्यतत्त्वज्ञानं निःश्रेयसहेतुरिति सूत्रोक्तपदार्थानुद्दिश्य तल्लक्षणं व्याकरोति। एते
षामिति। उक्तानां पदार्थानामित्यर्थः। तत्र पदस्य रूढ्यर्थमाह। तत्त्वमिति। आरोपितेषु क्रि
रजतादावतिव्याप्तिवारणायानारोपितमिति तस्यारोपितत्वान्नातिव्याप्तिः। ज्ञानपदस्य
अनुभवपरतामाह। तस्येति। तदवान्तरभेदमाह। सचेति। अनुभव इत्यर्थः। श्रुतिस्मृति
इतिहासपुराणपु[illegible]तात्पर्यावधारणं श्रवणं असंभावनाविपरीतभावनानिरा
सनयुक्तिभिरनुचिंतनं मननं। श्रुतस्य मननस्य तथैव ध्यानं निदिध्यासनं। इदमि

मेवेत्यपरो लक्षणार्थं स्यात्कारः। एवंलक्षणं स्वरूपं यस्य [illegible] अनुभवस्य संतत्या निःश्रेय
सपदार्थमाह। निःश्रेयसं तु पुनरिति। समस्तानां दुःखानां अभावः समस्तदुःखाभावः
तस्य मिथ्याज्ञानस्य कार्याणि तत्कार्याणीति दुःखविशेषणं मिथ्याज्ञानं च तत्कारणं चेति
मिथ्याज्ञानकारणं तस्य प्रध्वंसस्तेन समानमधिकरणमाधारो यस्य तत्कार्यसमस्त
दुःखाभावस्य स तथा तत्त्वज्ञानोत्पाद्यश्चासौ मिथ्याज्ञानकारणप्रध्वंससमानाधिकर
२नु६ णतत्कार्यसमस्तदुःखाभावश्चेति कर्मधारयः। तत्र तत्त्वज्ञानोत्पाद्यसमस्तदुःखाभाव
इति निःश्रेयसपदार्थनिरूपणं कृतं तत्तु समस्तदुःखाभावसामग्रीकथनं प्रवृत्ति
निमित्तमेव निःश्रेयसलक्षणमपि तत्र घटाभावे मोक्षत्ववारणाय दुःखेति पदं। अ
हिकंटकादिजनितदुःखाभावस्य सुषुप्तौ वर्त्तमानस्य च मोक्षत्वं माभूदिति सम
स्तेति पदं। एवमपि वक्ष्यमाणशरीरादिसमस्तदुःखाभावोऽपि घटे प्रलये तद्वारणाय
तत्त्वज्ञानोत्पाद्येत्युक्तं। प्रलये तु शरीरादेरभावोऽदृष्टनिमित्तः न तत्त्वज्ञानोत्पाद्य इति
नातिव्याप्तिः। ननु तत्त्वज्ञानस्य समस्तदुःखाभावोत्पादने किं द्वारमत आह। मिथ्या

मि०

३

ज्ञानकारणध्वंसेनि। तत्त्वज्ञानेन दुःखाभावे जनीये मि[illegible]थ्याज्ञानप्रध्वंसो वा तत्र व्यापार इत्यर्थः॥
कार्यकारणपदात्यी मिथ्याज्ञानकारणध्वंसे तत्कार्यदुःखस्यावश्यं ध्वंसो भवतीति द
र्शयति देवदत्तमिथ्याज्ञानध्वंसोऽपि यज्ञदत्तसमस्तदुःखाभावो नास्तीति समानाधि
करणीभूतं। यस्मिन्नात्मनि मिथ्याज्ञानध्वंसः तस्मिन्नेव समस्तदुःखाभाव इत्यर्थः॥
ननु कोयं समस्तदुःखाभावः। किं प्रागभावः उत प्रध्वंसाभावः उतान्योन्याभावः॥
किं वात्यंताभावः॥ नाद्यंत्योतयोरनुपत्तेरपुरूषार्थत्वात्। पुरूषप्रयत्नसाध्यो हि पुरूषा
र्थः। प्रागभावात्यंताभावयोरनादित्वेनानुसाध्यत्वात् दुःखात्यंताभावस्य समस्तदुःख
प्रागभावस्य चात्मन्यसंभवात्। बहूनां दुःखानां तत्र निष्पन्नत्वात्। नापि तदन्योन्याभा
वो मोक्षः संसारदशायामपि दुःखमात्मा न भवतीति तदन्योन्याभावसद्भावेन मुक्त
त्वप्रसंगात्। नापि दुःखप्रध्वंसो मोक्षः समस्तशब्देन शरीरादादिविवक्षितत्वात्॥
त[illegible]चातीतस्य स्वत एव ध्वस्तत्वेन तत्त्वज्ञा[illegible]नानपेक्षणात्। वर्तमानस्य च पूर्वे व
तत्कारणादेव ध्वंससंभवात्। आगामिशरीरादेस्तु अनुत्पन्नत्वेन ध्वंसासंभवात्॥ ॥२४॥

आगामिशरीरादिकमुत्पाद्य तद्ध्वंसे तत्त्वज्ञानस्यापि दुःखजनकत्वप्रसंगात्। तस्मात् समस्त
दुःखानां शरीरादीनां ध्वंसोऽनुपपन्न इति चेन्न। अत्रोच्यते। आगामिशरीराद्युत्पादरूपदु
श्रा३ खप्रागभाव एव मोक्षः। तत्त्वज्ञाने हि सत्यागामिशरीरादिकं नोत्पद्यते। न च तस्यानुत्पाद्यत्वे
नापुरुषार्थत्वं प्रायश्चित्तादिसाध्यदुःखानुत्पादवत् तस्यापि परिपालनरूपसाध्य
त्वसंभवात्। तत्त्वज्ञाने हि सति दुःखकारणमिथ्याज्ञानादिध्वंसात् प्रागभावस्योत्तरका
लसंबंधरूपपरिपालनं संभवति। तत्त्वज्ञानाभावे हि दुःखकारणेन प्रागभावनाशात्।
दुःखोत्पत्तिरेव संभवति। अतोऽन्वयव्यतिरेकाभ्यां प्रागभावपरिपालनं साध्यमिति
नापुरुषार्थत्वं। न च समस्तदुःखप्रागभावासंभवः। समस्तपदेन शरीराद्येकविंश
तिप्रकारस्य विवक्षितत्वात्। तस्य चागामिनः पूर्वमजातत्वेन प्रागभावसंभवात्॥
न च प्रागभावस्य प्रतियोगिजनकतानियमात् मुक्तस्य संसारिकताप्रसंग इति वाच्यं
न स पुनरावर्तत इति मोक्षशास्त्रविरोधेन मोक्षरूपप्रागभावव्यतिरिक्ते प्रागभावे प्र
तियोगिजनकत्वस्य नियमस्य संकोचनात्॥ अन्यथा प्रायश्चित्तविधेरपि वैयर्थ्या
पत्तिः। तद्धि नाश्यपापजन्यदुःखप्रागभावस्यापि प्रतियोगिजनकत्वनियमात्।

47

मोक्षश्चास्त्वं तु न स पुनरावर्त्तते। इमे मानवमावर्त्तं नावर्त्तन्ते इति। यद्वा चरमशरीरादिदुःखध्वंसो मोक्षः। चरमशरीरादिकं तत्त्वज्ञाने सति संचितकर्मक्षयापञ्चोगार्थं योगजसामर्थ्यगृहीतशरीरमध्ये यदन्तिमं तदेव। अथवा यत्र शरीरे तत्त्वज्ञानमुत्पन्नं तदेव शरीरादिकं चरमं तत् २४ रेषी भोगार्थस्वयमुत्पादितत्वेन चरमत्वाभावात्। ननु तत्त्वज्ञानं विना वर्त्तमानशरीरादिध्वंसः पूर्ववत्संभवतीति चेन्न। तदा तस्य चरमत्वाभावात्।।

चरमशरीरध्वंसस्य चान्वयव्यतिरेकाभ्यां तत्त्वज्ञानजन्यत्वेनावधारणात्। तत्त्वज्ञानेन हि मिथ्याज्ञानध्वंसे तन्मूल रागद्वेषयोरभावात्तदधीनयोर्धर्माधर्मस्याघुनेप्रवृत्त्याद्यभावेन तद्धेतुकायतनजन्मादेरभावात्तन्निमित्तदुःख[redacted]स्याप्यभावः। तथा च तत्त्वज्ञानसमानकालीनं शरीरादिकं चरमं। एवं तत्त्वज्ञानाभावादस्मदादेश्चरमदुःखध्वंसो नाप्यजनिप्रपाव शुकादीनां शरीराद्यघनालव्यतिरिक्तात्मेति एवं साक्षात्काररूपस्तत्त्वावबोधः समभूत्तेषां चरमदुःखध्वंसो मि अजनिष्ट। अन्वयव्यतिरेकाभ्यां तस्य कारणतासिद्ध्याति। अतो नात्र कश्चिद्दोषः। मोक्षसाधनं च ज्ञानमेव ज्ञानादेव तु कैवल्यं प्राप्यते येन मुच्यते इति वचनात्। न तु कर्मा। न च ज्ञानकर्मसमुच्चयः। कर्मणा हि मिथ्याज्ञाननाशकत्वादर्शनात्। तन्नाश

मेतरेण मोक्षासंभवात्। तत्वज्ञानस्य च रज्जुसर्पभ्रमादौ मिथ्याज्ञाननाशकत्वदर्शनात्। नहि तत्र निकृष्टोपसर्प्पणादिक्रियावतोपि रज्जुतत्वज्ञानं विना सर्प्पभ्रमो निवर्त्तत इति सर्वमवदातं। किं तत्समस्तदुःखं यस्याभावो मोक्षोऽत आह दुःखमिति। शरीरं प्रसिद्धं षडिंद्रियाणि घ्राणरसनचक्षुःश्रोत्रत्वङ्मनांसि। तद्ग्राह्याः विषयाः षड्गंधरसरूपशब्दस्पर्शाः सुखादयः तज्ज्ञानानि षड्बुद्धयः। सुखं दुःखं च प्रसिद्धं। तत्र शरीरादीनां दुःखसाधनत्वात् सुखस्य दुःखसंभिन्नत्वेन दुःखत्वं दुःखं मुख्यमेव दुःखमिति विवेकः॥ यामोद्भवसरस्वत्या रचिता मितभाषिणी॥ तत्रोद्देशप्रकरणव्याख्यागोचरतामियात्॥१॥ श्रीगणपतये नमः॥ ॥छ॥

एवं सूत्रोद्देशं व्याख्यायेदानीमुत्तरग्रंथसंगतिमाह। इदानीमिति॥ एवकारेण परीक्षाव्युदासः। लक्षणमेवोच्यत इत्याह॥ लक्षणेति॥ लक्षणेन विना पदार्थानामितरव्यावृत्तिव्यवहाररूपतत्वज्ञानस्याभावात्। आत्मानात्मविवेकासंभवात्॥ तदर्थं लक्षणमेवोच्यत इत्यर्थः॥ लक्षणमेवाधीनं निमित्तं यस्य तस्याभावस्तत्तस्मादिति विग्रहः। लक्षणेनानामतल्लक्षणमाह। नत्रेति॥ नन्वेवमनवस्था

मि०

तस्य लक्षणस्य लक्षणान्तराक्षिमानादिति वाच्यं। इदमेवैकं लक्षणलक्षणी सर्वस्यापि
लक्षणस्य ज्ञानं कुर्वत् स्वस्यापि लक्षणत्वेन सर्वतःपातित्वात्। स्वज्ञानमपि जनय
ति। स्वाध्यायप्रमेयपदवत्। न तु स्वज्ञानाय लक्षणान्तरमपेक्षते। येनानवस्था स्यात्॥
न चात्माश्रय इति चेन्न। व्यवधानेन स्वेनैव स्वज्ञानमात्माश्रयः। अत्र सर्वल
क्षण द्वारा स्वस्यापि ज्ञानं जनयतीति व्यवधानान्न दोषः। तस्माल्लक्षणज्ञाना
य लक्षणं वाच्यमिति तदुच्यते। न चेति॥ लक्षणानां मध्य इत्यर्थः॥ विशेषपदार्थे
ति। व्याप्तिवारणाय हेत्विति॥ अन्वयिनि तद्वारणाय व्यतिरेकीति॥ अन्वय
व्यतिरेकिणि तद्वारणाय केवलेति। जीवच्छरीरं सात्मकं प्राणादिमत्वादि
त्यादौ तद्वारणाय विशेषपदं केवलव्यतिरेकिणि हेतौ विशेषत्वमसाधार
णधर्मवत्वं। केवलव्यतिरेकी पंचावयवोपपन्नः। लक्षणस्य तदभावा
त्कथं तत्वमित्याशंक्यानुमानेन रचयति। प्रयोगस्त्विति॥ लक्षणपक्षः। इतरेभ्यो
भिद्यत इति साध्यं। लक्षणव्यतिरिक्तसकलप्रतियोगिकान्योन्याभाववदित्यर्थः।
व्यतिरेकव्याप्तिमाह। यदिति॥ क्रमेत वैस्येतरमध्येपतितत्वाल्लक्षणनिष्ठ ॥२६५

सेदे प्रतियोगित्वं न तु भेदाधारत्वं। अत आह। इतरेभ्यो भिद्यत इति साध्या
भावो हि हेत्वभावव्याप्यस्तीति व्यतिरेकदृष्टांते तथैव मतत्वस्य। व्यतिरेकव्याप्तेर्हे
तोः पक्षनिष्ठत्वलक्षणं व्यतिरेकोपनयमाह॥ न चैतत्पदमिति किंतु भवत्येवे
त्यर्थः। प्रतिज्ञातार्थविपरीतनिरासफलकं निगमनमाह। तस्मादिति। तस्मा
दनुमत्वादित्यर्थः॥ सर्वेषु लक्षणेष्वितरभेदसाधनप्रकार एवमेवेत्यतिदिशति॥
एवमिति॥ यस्य लक्षणं तमेव हेतुं विधाय लक्ष्यमेव पक्षीकृत्य इतरभेदसाध
नं व्यतिरेकिणा कर्तव्यमित्यर्थः। सामान्यलक्षणं विना विशेषलक्षणासंभ
वमाशंक्याह। स्मार[illegible]ति॥ तत्रेति। [illegible]त्र लक्षणे वक्तव्ये सति सामान्यलक्षणं
कृतमित्यर्थः। पघादिशामिति विषयत्वं च पदार्थसामान्यलक्षणं तस्य केव
लान्वयित्वेन न केवलव्यतिरेकिहेतुविशेषरूप[illegible] त्वाभावात्। न चापि ल
क्षणशब्देनात्र पदार्थमात्रवृत्तिधर्मो गौण्या वृत्त्या विवक्षितः। गुणस्तु ता
वन्मात्रवृत्तिलक्षणं हि लक्ष्यमात्रे वर्त्तते प्रमितिविषयत्वमपि पदार्थमात्रे

51

मि०

वर्त्तते। अतो गुणयोगाल्लक्षणपदं पदार्थशब्दप्रवृत्तिनिमित्तं प्रमितिविषयत्वं वर्त्तत
इति द्रष्टव्यं। ग्रंथकारोक्तव्याप्तिमुख्यत्वासंभवे गौणत्वमाश्रयणीयमेवेति
लक्षणशब्दो गौणप्रयुक्तो द्रष्टव्यः॥ द्रव्यादीनां क्रमेण लक्षणान्याह॥ द्रव्यति
त्यादिना। सामान्ययोगित्वं गुणादावपि व्यापकमिति द्रव्यत्वेति। ननु द्रव्यत्वं भाव
रूपं नास्त्येव अद्रव्यापोहेनैव सकले द्रव्यानुगतेन द्रव्यं द्रव्यमिति व्यवहारो
पपत्तेरिति वदंतं बौद्धं निराकर्त्तुं सामान्ये त्रिपदी। अयमाशयः। अद्रव्यापोहस्य
द्रव्यनिरूप्यत्वात् प्रथमं द्रव्यव्यवहारो वक्तव्यः। स चानुगतद्रव्यत्वसामान्यं
विना न संभवतीति तत् प्रथममभ्युपेयं अन्यथा अद्रव्यत्वस्यानेन दपोहेन
द्रव्यानुगतव्यवहारः। द्रव्यव्यवहारेव सति द्रव्यत्वसामान्यस्यानिरूप्या
द्रव्यत्वानमिति इतरेतराश्रयप्रसंग इति। एतत्सर्वं समानानां भावः सामान्य
मितिपदव्युत्पत्त्या सूचितं। एवमग्रेपि सामान्यपदमपोहवादिनिरासायेति द्रष्ट
व्यं। तदपि सामान्यपदं जातिपरं। तेन द्रव्यत्वं जातिर्नास्ति व्यंजकाभावादिति वद
न्प्राभाकरोपि निरस्तो वेदितव्य इति सूचयन् द्रव्यत्वजातिव्यंजकमाह॥ गुणो ॥१८॥

वत्समवायिकारणत्वे चेति ॥ जात्येतन्निराधारस्यावृत्तेस्तदाधारगतो धर्मो व्यंजकः यथा
२२ गोत्वस्य सास्नाद्या[illegible]वत्वेन तथा गुणवत्वे समवायिकारणत्ववद्द्रव्यत्वस्य व्यंजकत्वं।
यत्र यत्र गुणवत्वं तत्र तत्र द्रव्यत्वं इत्युपदेशात् सहचरितत्वप्रमसेण रत्नेतत्ववत्
द्रव्यत्वे प्रतीयत इत्यर्थः। यद्वा एतदपि लक्षणद्वयमेवं न चोभयोर्द्रव्यलक्षणमात्रे
गुणरहिते गुणवत्वमव्यापकमिति वाच्यं कदाचित् गुणवत्वस्याविवक्षितत्वात्
यदा गुणात्यन्ताभावविरोधित्वं गुणवत्वं विवक्षितं। गुणात्यंताभावविरोधित्वं च
गुणवत्प्रागभावप्रध्वंसाभाव[illegible]न्तद्वत्वं लक्षणार्थः। त[illegible]भावोस्ति समयेपि गुण
प्रागभावोस्ति। अतो नाव्याप्तिरित्यर्थः। एवं समवायिकारणत्वेपि द्रव्येन वातिव्या
पक मु[illegible]य गुणादौ तदुभयाभावात् गुणत्वजातेर्व्यंजकमाह। जातिमत्वमिति ॥
जातिमदवनामकासमवायिकारणत्वं गुणत्वजातिव्यंजकमित्यर्थः ॥ यद्वा लक्ष
णान्तरं जातिरस्यास्तीति जातिमान् तस्य भावस्तत्वं त[illegible]न्सति चलनेकर्म
तदासमकेन भवतीत्यचलनात्मकत्वे सति समवायिकारणं समवायिकारण
र्वं धर्मिण्यधर्मोत्कृष्यते तत्र इति तदुत्यर्थः ॥ गगनारविंदेत्यतिव्याप्तिवारणाय
समवायीति ॥ गगनारविंदं कारणमेव न जनयति। गुणस्तु कारणं जनयति सम

मि०

वायिकारणेनुगतत्वमर्थः॥ समवायिकारणत्वेमरहितं कर्मा विभवत्ति॥
व२ नघैछेदायाचलेनात्मकत्वेसतीति। कर्मं तु चलनात्मकमिति तद्यावृत्तिः। एवमपि
सामान्यादेः प्रसंगः न द्वारणाय जातिमत्वेसतीति। सामान्यादिचतुष्टयेनुजाति
रहितमिति न दोषो भवति। कर्मणि द्रव्ये चातिव्याप्तिवारणाय द्वीतीयतृती
यपदे। कर्मत्वजातेर्व्यंजकमाह। घेति। आद्यो यौ संयोगविभागौ संयोगज
विभागजव्यतिरिक्तौ नयोरसमवायिकारणत्वं कर्मत्वव्यंजकमित्यर्थः। वस्त्व
र्थः व्यंजकाभावशंकानिरासाय। यदा लक्षणांतरं। चः समुच्चयार्थः।
कारणमात्रमदृष्टादावतिव्यापकमतो समवायीति॥ एवं च रूपादौ। रूपादे
रपि तंत्वादिगतस्य पटादिगतरूपादिकं प्रत्यसमवायिकारणत्वात्। अत आह संयो
गविभागेति॥ आद्यसंयोगविभागयोरतिव्याप्तिः तयोरपि संयोगजसंयोगवि
भागजविभागौ प्रति असमवायिकारणत्वात् अत आद्येति। आद्यसंयोगविभा
गकारणत्वे तदाधारद्रव्ये पटादिं प्रति न कारणायोसमवायीति। कारणपदस्पष्टा
र्थं। सामान्यादिषु जात्यभावान्नागमनं लक्षणमित्येकैकमेव लक्षणं॥ तत्र ॥२८॥
प्रतिप

सामान्यं लक्षयति ॥ नित्यमिति ॥ समवेतमित्युक्ते रूपादावतिव्याप्तिरत आहानेकेति ॥ एताव
त्युक्ते संयोगेऽतिव्याप्तिरत उक्तं नित्येति ॥ नित्यमनेकसमवेतमित्युक्तेऽनेकेषां विशेषाणा
मनेकसमवेतत्वं वास्तीति तत्रातिव्याप्तिवारणाय एकमिति केचित् । तदपरे न सहन्ते ॥ नित्य
मनेकसमवेतमित्येतावतैव विशेषेऽतिव्याप्तिनिरासात्प्रत्येकं तेषु तदभावात् ॥ अतः स्वरूप
कथनायैवैकमिति ॥ यद्वा इदमेकं लक्षणमित्येकशब्देनोच्यते ॥ लक्षणान्तरं तु स्वयमाह ।
[illegible]भावत्वे सति विशेषसमवायान्यत्वे सामान्यं सामान्यं ॥ विशेषलक्षणे एक
व्यक्तिवृत्तिरित्युक्ते रसादावतिव्याप्तिस्तद्वारणाय सामान्यरहित इति ॥ समवायादौ
तद्वारणाय एकव्यक्तिवृत्तिरिति । नन्वनेकव्यक्तिवृत्तेरपि सामान्यस्यैकव्यक्तिवृत्ति
त्वमस्त्येवेति तत्रातिव्याप्तिरिति चेत् । सत्यं । एकव्यक्तिमात्रनिष्ठत्वस्य तत्समवेतत्वस्य
विवक्षितत्वात् न दोषः ॥ समवायलक्षणे संयोगेऽतिव्याप्तिस्तस्यानित्यत्वादिति वाच्यं ॥
अन्यतरकर्मोभयकर्मणोस्तत्कारणयोरात्माकाशादावभावेन तयोः संयोगाभावात् ।
तस्य नित्यत्वे मानाभावाद्द्रव्यत्वेन संयोगसाधने विभागोऽपि तेनैव सिध्येत् ॥
वारणाय नित्येति । गगनादौ तद्वारणाय संबंध इति न वाय्वाकाशसंयोगेऽतिव्याप्तिः ॥ २

×गंधवत्वं पृथिवीत्वस्य व्यंजकमित्यर्थः ॥ यद्वा लक्षणांतरं । नव्यमते गंधवत्वादौ अव्याप्तिः तत्रापि पाकजरूपेण ४॥
व्या०

मि०

तथा च कृतः संयोगस्य नित्यत्वमिति ॥ अभावत्वं लक्षयति ॥ प्रतियोगीति । स्वाभावविरहात्मा प्रति
योगी । प्रतियोगिज्ञानाधीनज्ञानीयस्य स तथा अधीनत्वं जन्यत्वं । ज्ञानाधीनज्ञानोऽभाव इत्युक्ते
समवायेऽतिव्याप्तिः । तस्यापि संबंधिज्ञानाधीनज्ञानत्वात् ॥ अत उक्तं प्रतियोगीति । संबंधि
नश्च समवाये विरहत्वाभावान्न प्रतियोगित्वं किंतु संबंधित्वमात्रं इदानीमवांतरविभाग
मुक्तमेण लक्षणान्याह ॥ पृथिवीत्यादिना ॥ पृथिवीत्वजातिव्यंजकमाह गंधवतीति । गंध
वत्वानुमानात् । यद्वा वज्रादिष्वस्मृतिगंधत्वोपलंभात् ॥ तत्परमाणुषु गंधवत्वमनुमीयते
त एव वज्राधारे च काइति ॥ तत्रापि गंधवत्वसिद्धिः । न च जलादावतिव्याप्तिः ॥ तत्र गंधवत्वस्यौ
पकादिपार्थिवोपाधिनिमित्तत्वात् ॥ ×व× अप्त्वव्यंजकमाह ॥ शीतस्पर्श इति ॥ शीतस्पर्शव
त्वं व्यंजकमित्यर्थः । यद्वा लक्षणांतरं । तत्र स्पर्शवत्वं पृथिव्यादावतिव्यापकमत उक्तं शीते
ति । शीता आप इत्युक्ते सामानाधिकरण्यात् गुणगुणिनोरभेदभ्रमः स्यात् तद्वारणाय स्प
र्शेति । एवं च शीतस्पर्शो यासामिति बहुव्रीहिणा भेदप्रतीतेर्न भेदभ्रमो भवतीति ॥
न च चंद्रेऽतिव्याप्तिः ॥ तत्र हि चंद्रमंडलांतरेकावयवोपष्टंभजलावयवगतं शैत्यं संयु
क्तसमवायात्प्रतीयते ॥ ननु स्वाभाविकं शैत्यं । न चोष्णोदकेऽतिव्याप्तिः । तत्रापि वह्निस्प ॥२५॥

र्शेन तस्याभिभवात्। बलवत्सजातीयसंबंधस्याभिभावकत्वात्॥ एवं तेजोलक्षणेपि द्रष्टव्यं। न च तेजोलक्षणं चंद्रसुवर्णादावव्यापकं। चंद्रे जलस्पर्शाभिभूतस्य सुवर्णादौ तु पार्थिवस्पर्शाभिभूतस्योष्णस्पर्शस्य सत्वात्। वायुत्वव्यंजकमाह॥ अरूपेति॥ अरूपस्पर्शवत्वं व्यंजकमित्यर्थः। पदानि लक्षणांतरे। तत्र स्पर्शवत्वं तेजःप्रभृतिष्वतिव्यापकमतोऽरूपेति॥ अरूपवत्वमाकाशादावतिव्याप्तमतः स्पर्शवानिति। आकाशादित्रयस्य जातिभावादेकैकमेव लक्षणमाह॥ शब्देति॥ आत्मादावतिव्याप्तिवारणाय शब्देति॥ शब्दवदित्यत्रैन कोपि दोषः। तथापि तस्य भाट्टमतसिद्धद्रव्यत्वनिरासेन गुणत्वसत्वेनाय गुणपदं। शब्दो गुणः। बहिरिंद्रियव्यवस्थाहेतुत्वात्। रूपवदिति। शब्दस्य गुणत्वसिद्धिरित्यर्थः॥ आदित्यपरिवर्तनेन सूर्यस्पंदः तेनोत्पाद्ये परत्वापरत्वे तयोरसमवायिकारणं कालपिंडसंयोगस्तदाधार इत्यर्थः॥ अनधिकरणीकाले इत्युक्ते असंभवः॥ कालस्यापि द्रव्यत्वाधिकरणत्वात्॥ यदा घटत्वानधिकरणे पटेऽतिव्याप्तिः। तदुक्तौ परत्वापरत्वेति तयोः पिंडनिष्ठत्वेन कालस्य तदनधिकरणत्वं॥ एतावत्युक्ते समवायेऽतिव्याप्तिस्तत आधार इति। एवं च कर्मण्यतिव्याप्तिस्तदर्थं कारणेति। तथाप्यनिवृत्तिस्त

मि०

स्यापि तन्नकारणता कर्मत्वाधारत्वात् ततोऽसमवायीति। कर्मणस्तु कर्मत्वाधारत्वेप्य
समवायिकारणताधारत्वाभावान्न दोषः॥ असमवायीत्याद्युक्ते गगनादावतिव्याप्तिः।
तन्तुकर्मपरत्वापरत्वेति। एतावन्मक्ते दिश्यतिव्याप्तिस्तन्तुकर्मादिग्वृत्तिरूपाधारतेति वि
डेतिव्यापकं। अतोऽग्रेतनं परत्वेत्यादि। एतत्तु परत्वापरत्वगर्भितं अपरत्वगर्भितं लक्ष
णद्वयं द्रष्टव्यं। पुर्वं दिग्लक्षणमपि द्रष्टव्यं॥ एतावांस्तु विशेषः। कालेऽतिव्या
प्तिवारणाय आदिमसंयोगानुत्पाद्येति। आत्मानं लक्षयति। आत्मत्वेति॥ आत्मत्व
व्याप्यात्मत्वस्य संताभावाप्रतियोगिद्रव्यत्वान्यजातिरात्मत्वसामान्यं तद्योगीत्यर्थः॥
आत्मत्वं लक्षमाह। बुद्धीति। बुद्धिर्गुणो यस्य तत्स्वभाववत्त्वं तदात्मत्वं लक्षणमि
त्यर्थः। यदात्मलक्षणीतरे। तत्र गुण आत्मेत्युक्तेऽसंभवः। ततः गुणवानात्मेत्युक्ते ग
गनादौ गच्छतीति। तद्वारणाय बुद्धीति। गुणेति स्पष्टार्थं। अथवा बुद्धिरात्मेत्युक्ते दृष्टौ
बौद्धबुद्धिस्तद्व्ये गुणपदं। तथात्वे वात्मनोऽनित्यत्वप्रसंगादिति। यद्वा गुणवदिति
सामान्यलक्षणानुगतिद्योतनाय गुणपदमिति॥ मनसो लक्षणमाह। मनस्त्वेति।
गगनावृत्तिस्पर्शविरहसंतानाभावाधिकरणक्रियावद्वृत्तिजाति मनस्त्वं तद्योगीत्यर्थः॥ ॥३०॥

मनस्त्वव्यंजकमाह। स्पर्शेति। स्पर्शशून्यत्वे सति क्रियाधारत्वं मनस्त्वव्यंजकमित्यर्थः॥
यद्वा लक्षणांतरं। तत्र घटादिवारणाय स्पर्शेति। गगनादिनिरासाय क्रियाधिक
रणमिति। क्रियाधिकरणत्वं तु मनसोऽणुत्वादेव सिद्धं। अन्यथा मनसो विभुत्वे
आत्मनोपि विभुत्वात्ताभ्यां सर्वपदार्थसंबंधे ज्ञानयौगपद्यापत्तिः। बाह्येंद्रिय
त५ तद्विषयासंबंधान्नेति चेन्न। तर्हि तद्विषयेंद्रियाणां युगपत्संबंधे ज्ञानयौगपद्या
पत्तिः। इष्टमेतद्दीर्घशष्कुलीभक्षणादाविति चेन्न। व्यासंगस्यलेकमेदर्शने
न तत्रापि क्रमानुमानात् यौगपद्यप्रतीतेर्भ्रांतत्वात्॥ व्यासंगो नाम मनसोऽन्या
सक्तत्वं। तत्र हि कूपादौ सकलविषयसंबंधेपि-शब्दमश्रौषं रूपं नाद्राक्षं गंधं
र्यं नान्वभूवमस्यैर्यं नास्प्राक्षमिति सर्वानुभवात्। अणुत्वे तु येनेंद्रियेण मनः सं
बध्यते तेनैव ज्ञानं जायते नान्येनेति युक्तो यौगपद्याभावः। अतः सिद्धं क्रियावत्त्वं
मनसः। गुणावांतरन्मेदानीकृ×ने×मेण लक्षणानि दर्शयन् रूपं लक्षयति। रूपवेति॥ ए
केलक्षणमेकं तु जातिव्यंजकमिष्यते। एवं सर्वत्र विज्ञेयमथवा लक्षणांतरं। रसाव्यति
तेजसेंद्रियमात्रग्राह्यगुणव्यतिज्ञाती रूपहं तद्योगीत्यर्थः॥ लक्षणपक्षे गुणइत्यक्तेः

59

तींद्रियधर्म्मादावतिव्याप्तिवारणाय ग्राह्येति। ग्राह्यो गुणो रूपमित्युक्ते रसादावतिव्याप्ति
रतदुक्तं चक्षुर्ग्राह्य इति। एवमुक्ते संयोगादौ तत उक्तं मात्रेति। संयोगादेर्द्वींद्रियग्राह्यत्वान्न
चक्षुर्मात्रग्राह्यत्वं। रूपत्वे प्रसंगवारणाय गुणेति॥ संपूर्णमपि प्रभाकुड्यसंयोगमतिव्या
पकं ततो विशेषगुण इति द्रष्टव्यं। तथा च चक्षुर्मात्रग्राह्यो विशेषरूपमिति। यद्वा चक्षुर्मात्र
ग्राह्यजातिमान्गुणो रूपमित्यर्थः। संयोगस्य न तथात्वान्न संयोगेऽतिप्रसंगः। रूपावृत्ति
जलेंद्रियग्राह्यगुणवृत्तिजातीरसत्वं॥ लक्षणेतु रूपादावतिव्याप्तिवारणाय रसनेति॥
रसनग्राह्य इत्युक्ते रसत्वेऽतिप्रसंगः॥ तदर्थं गुण इति। पार्थिवेंद्रियग्राह्यवृत्तिस्पर्शा
वृत्तिजातिर्गंधत्वं॥ लक्षणेतु रसादावतिप्रसंगवारणाय घ्राणेति॥ तनश्च गंधत्वे जातौ गतं
तद्वारणाय गुण इति। स्पर्शं लक्षयति। स्पर्शत्वेति। रूपत्वलक्षणकावच्छेदकावच्छिन्ना
त्यंताभावाधिकरणविभुत्वानधिकरणद्रव्यवृत्तिविशेषगुणवृत्तिगुणत्वावांतरजातिः
स्पर्शत्वं। जातिव्यंजकमाह स्पर्शनेति॥ स्पर्शनमात्रग्राह्यगुणत्वं स्पर्शत्वव्यंजकमित्यर्थः॥
लक्षणापक्षे स्पर्शनग्राह्यसंयोगेपि तद्वारणाय मात्रेति॥ स्पर्शनमात्रग्राह्यत्वं स्पर्शत्व
जातावपीति तदर्थं गुण इति॥ शेषं पूर्ववत्। एतेषु चतुर्ष्वपि लक्षणेषु नहि द्विंद्रियग्राह्ये ।३१।

60

गुणत्वावान्तरजातिमत्तित्वं निष्कृष्टोऽर्थः। तेन परमाणुरूपादिषु नाव्याप्तिः। वस्तुमात्रग्रा
ह्यगुणत्वावान्तरजातिमद्रूपं। एवमुत्तरत्रापि द्रष्टव्यं। संख्यां लक्षयति। संख्यात्वेति॥
गगनसमवेतसमान्यगुणवृत्तिद्विष्ठगुणमात्रावृत्तिपरिमाणपृथक्त्वानिष्ठासं
ताभावप्रतियोगितावच्छेदकावच्छिन्नगुणत्वसाक्षाद्व्याप्यजातिः संख्यात्वं। जातिव्यंज
कमाह। गणनेति। लक्षणे तु कारणं संख्येत्युक्ते साधारणकारणे ईश्वरेच्छादावतिप्रसं
गः। ततोऽसाधारणेति। एवमपि परिमाणादौ प्रसंगस्ततो गणनेति। यज्जातीये सति यज्जा
तीयं ज्ञायतेऽसति च न ज्ञायते तत्तस्यासाधारणं। यथा तंतुः पटस्य। यथा च कर्म्मसंगा
देः॥ तथा गणनां प्र[illegible]साधारणीकारणं संख्या। ज्ञानं प्रति तु नासाधारणं कारणं। संख्यां विना
पि अन्यस्माद्घटादेर्ज्ञायमानत्वात्॥ संख्याज्ञानं प्रति संख्याया असाधारणकारण
त्वेपि तस्यागज्ञानं प्रति तु नासाधारणकारणत्वं व्याहन्यते उक्तलक्षणसत्वात्। नहि घ
टस्यरूपादिचतुर्दशगुणान्प्रति साधारणत्वेपि प्रत्येकमसाधारणत्वं व्याहन्यते॥
नहि घटः साधारणीकारणमिति व्यवहरंति तैर्थिकाः॥ किंत्वीश्वरेच्छादीनी साधार
णकारणानीति तेषां सदा सत्वेपि तंत्वादिकं विना विशेषकार्यानुदयात्। तस्मात्स्व

61

त्तानेप्रति हेतुत्वेऽपि गगनानां साधारणकारणत्वं। संख्यायाइतिसिद्धं। परिमाणं लक्ष
यति॥ परिमाणत्वेति॥ संख्याऽसमवायिकारणकृत्वस्यापेक्षाबुद्ध्यसाधारणकार
णताकाऽव्यत्तिगुणत्वसाक्षाद्व्याप्यजातिः परिमाणत्वं। जातित्वेजकमाह मानेति।
मानमियत्तात्ल्लक्षणपक्षे व्याख्यानेपृथक्त्वं। पृथक्त्वं लक्षयति॥ पृथक्त्वेति॥
अपेक्षाबुद्ध्यसाधारणकारणसम[illegible]पवृत्तिगुणवृत्त्यत्यंताभावाप्रतियो
गिसंख्याऽवृत्तिजातिः पृथक्त्वं। तद्व्यंजकमाह। पृथगिति। पृथग्व्यवहारइ
दमस्मात्पृथगित्येवंरूपः। संयोगं लक्षयति॥ संयोगत्वेति॥ द्रव्याऽसमवायिकारण
वृत्त्यत्यंताभावाप्रतियोगिगुणत्वावांतरजातिः संयोगत्वं। तद्व्यंजकमाह॥ अनित्यइति॥
लक्षपक्षे समवायेऽतिव्याप्तिवारणायानित्येतिपदं॥ रूपादौ तद्वारणाय स्वत्वंघपदं॥
विभागं लक्षयति। विभागत्वेति॥ क्रियाऽसमवायिकारणकद्विष्ठगुणवृत्तिसंयोगा
वृत्तिगुणत्वसाक्षाद्व्याप्यजातिर्विभागत्वं। विलक्षणव्यवहारोऽस्मादिद्विलक्षमितिप्रत्य
यव्यपदेशौ। परत्वापरत्वे लक्षयति॥ परत्वेति॥ अपरत्वगुणवृत्तिपरत्वगुणवृत्तिजा
तिः परत्वं। परत्वावृत्तिसकलापरत्वगुणवृत्तिजातिरपरत्वं। परापरव्यवहारौ ॥३२॥

२१

ष्टदूतरत्वादौ सन्निसृष्टप्रसृष्टयोश्च परापरव्यपदेशौ ॥ लक्षणपक्षे व्यावृत्तिः पूर्ववत् ॥
बुद्धिं लक्षयति । बुद्धित्वेति ॥ सुखावृत्तिसकलबुद्धिवृत्तिजातिर्बुद्धित्वं ॥ एवमुत्तरत्रापि
जातयस्तूह्याः । लक्षणपक्षे आत्माश्रयइत्युक्ते सुखादावतिव्याप्तिरत आह प्रकाश
इति । बाह्यादिप्रकाशेन तद्वारणाय आत्माश्रयइति । सुखं लक्षयति ॥ सुखमिति । लक्ष
णपक्षे वैधे सुखमित्युक्ते दुःखसाधनादावतिप्रसंगस्तदर्थमनुकूलमिति । एवं सुख
साधनेऽतिप्रसंगः तदर्थं निरुपाधीति । निरुपाधित्वमनन्यद्वारकत्वं सुखसाधने
तु सुखद्वारेणैवानुकूलमिति नातिव्याप्तिः ॥ न हि चंदनं निदाघे सुखसाधनमिति हे
मंतशिशिरयोः शीतार्त्तेनाप्यनुलिप्यते । दुःखं लक्षयति । दुःखत्वेति ॥ लक्षणपक्षे सुखा
दावतिव्याप्तिवारणाय प्रतिकूलेति । दुःखसाधनेऽहिकंटकादौ तद्वारणाय निरुपाधीति ।
दुःखसाधने तु दुःखद्वारेणैव प्रतिकूलमिति । नात्र प्रसंगः । विषवैद्यैः सर्पादेरपि गरुडस्य मा
न्यत्वात् ॥ तेषां तस्य प्रतिकूलत्वादर्शनादिति ॥ इच्छां लक्षयति ॥ इच्छात्वेति ॥ अर्थ्यते प्राथ
र्यतेरत्यर्थाग्रहादित्वाणिनिः तस्य भावे अपि वे प्रार्थनेति यावत् तदेव लक्षणं स्वरूपं

63

मि०

यस्याः सा तथा स्पष्टौ द्वेषं लक्षयति॥ द्वेषेति॥ ज्वलपतीति ज्वलनः एवमात्मा स्वरूपं यस्य स तथा क्रोधरूप इत्यर्थः॥ प्रज्वलनात्मकं यथा श्रुतैव ह्यो दावप्यस्तीति गुणप्रकरणात् गुणपदं संबंधनीयमिति नातिव्याप्तिः॥ यदा आत्मगुणप्रकरणत्वादात्माश्रय इति संबंधनीयमिति॥ प्रयत्नं लक्षयति॥ प्रयत्नेति॥ अहं प्रयते अहं करोमीत्यादिव्यवहारः प्रयत्नव्यवहारः शेषं सुगमं गुरुत्वं लक्षयति॥ गुरुत्वेति॥ लक्षणपक्षे कारणं गुरुत्वमित्युक्ते ऽदृष्टादावतिव्याप्तिस्ततो असमवायीति॥ एवमुक्ते संयोगादौ प्रसंगस्तत उक्तं पतनेति। पतनं नाम अधःसंयोगफलिका क्रिया। तस्या असमवायिकारणमित्यर्थः॥ एतावत्युक्ते नोदनाभिघातादिसंयोगे पतनहेतावतिप्रसंगस्तत उक्तं एकवृत्तीति॥ एकवृत्तित्वं रूपादावप्यस्तीति पतनेत्यादि। एकवृत्ति पतनकारणमित्युक्ते ऽदृष्टादौ गतं ततो ऽसमवायीति। द्रवत्वं लक्षयति द्रवत्वेति॥ लक्षणपक्षे रूपादावतिप्रसंगवारणाय स्पंदनेति। स्पंदनं प्रस्रवणं एतावत्युक्ते संयोगादौ गतं तदर्थं एकवृत्तीति॥ एकवृत्तित्वं तत् स्पंदनासमवायिकारणं चेति विग्रहः। स्नेहं लक्षयति॥ स्नेहत्वेति। लक्षणपक्षे द्रवत्वे ऽतिप्रसंगवारणाय द्रवत्वशून्य इति। द्रवत्वे ऽसामानाधिकरणमित्यर्थः॥ द्रवत्वशून्य इत्युक्ते रूपादौ प्रसंगस्ततः संग्रहेति। संग्रहो नाम ॥३७॥

वृत्तिदेः पिंडीभावः। अदृष्टादावतिव्याप्तिवारणाय साधारणेति॥ संस्कारं लक्षयति। संस्कारत्वेति॥ [illegible]स्य संस्कारस्योत्पत्तौ द्रव्यस्य याऽवस्था तस्या आपादकः॥ संस्कारो हि वेगभावनास्थितस्थापकरूपस्त्रिविधोऽपि स्वोत्पत्तिसम[illegible] यावस्थाऽद्रव्यस्य प्रतिपादयेति। तत्र वेगश्चलनावस्थां भावनाऽज्ञानवत्वावस्थां स्थितस्थापकोऽवेष्टनाद्यवस्थां प्रतिपादयतीत्यर्थः। संस्कारोक्तावस्थापादकत्वं तदाधारद्रव्यस्याप्यस्तीति तद्वारणाय गुण इति। गुणः संस्कार इत्युक्ते पारिमाण्डल्येऽतिप्रसंगस्तदर्थमापादक इति। आपादकत्वं कारणत्वं पारिमाण्डल्ये तु परमाणुपरिमाणे। तच्च न करणमिति न दोषो भवति। एवमप्युक्ते पटादिस्वरूपापादके तंतुसंयोगादावतिप्रसंगस्तदर्थमवस्थेति। एवमपि संयुक्तेऽवस्थापादके संयोगेऽतिप्रसंगस्तदर्थमुमतीति॥ एवमपि स्वरूपादावतिप्रसंगस्तन्नःस्वेति॥ [illegible]र्मं लक्षयति॥ धर्मत्वेति। लक्षणपक्षेऽधर्मेऽतिप्रसंगवारणाय सुखेति सुखकारणं धर्म इत्युक्ते ईश्वरादौ प्रसंगः। ततोऽसाधारणेति। अधर्मं लक्षयति॥ अधर्मत्वेति॥ लक्षणपक्षे धर्मेऽतिप्रसंगवारणाय दुःखेति॥ आत्मादौ तद्वारणाय। साधारणेति॥ शब्दं लक्षयति। शब्दत्वेति॥ गगनवृत्तिविशेषगुणावृत्ति [illegible] रूपावृत्तिजातिशब्दत्वं। लक्षणपक्षे सुखादाव

65

ति व्याप्तिवारणाय श्रोत्रग्राह्यत्वेति। श्रोत्रग्राह्यत्वं गुणत्वेपीति गुण इति। गुणत्वे तु प्रमाणमुक्तमे
व। कर्म्मावान्तरभेदानुलक्षयति उत्क्षेपणेति। उ[illegible]र्द्धसंयोगहेतुक्रियावत्तिकर्म्मत्वावान्तरजा
तिरुत्क्षेपणत्वं। एवमुत्तरत्राप्यूहनीयं॥ अपक्षेपणादावतिव्याप्तिवारणाय ऊर्द्धदेशसंयोगेति॥
कारणमित्यन्ते उत्क्षेपणाद्यारब्धेऽतिप्रसंगस्तदर्थं कर्म्मेति। उत्क्षेपणेऽतिप्रसंगस्तदर्थम
धोदेशसंयोगेति। शेषपूर्ववत्। विभिन्नस्य द्रव्यस्य कर्म्मण्याकुंचनेऽतिव्याप्तिवारणायापाद
कमिति॥ अपक्षेपणादौ तद्वारणाय वक्रत्वेति। आकुंचनादावेतद्वारणाय कर्म्मेति। इतरत्रक
र्म्मण्यतिव्याप्तिवारणाय ऋजुत्वेति। शेषंपूर्ववत्। अन्यत्र कर्म्मण्यतिव्याप्तिवारणाय अमितदेशे
ति॥ शेषं सुगमं। सामान्यभेदस्य लक्षणमाह॥ व्यापकेति। अपरसामान्यादावतिव्याप्तिवारणा
य व्यापकेति। व्यापकमात्रे परमित्युक्ते गगनादावतिव्याप्तिस्तत्तो वृत्ति सामान्यमिति। व्यापक
सामान्यं परमित्युक्ते परमपरेऽतिव्याप्ति[redacted]रतो मात्रेति। व्याप्यमात्रमित्युक्तेऽसंभवः॥
ततः सामान्यमिति। व्याप्यव्यापकमित्युक्ते वृत्त्यादावतिव्याप्तिरतः सामान्यमिति। शेषं सुगमं॥
विशेषसमवाययोरवांतरभेदाभावादभावभेदं लक्षयति॥ अनादीति। गगनादावतिव्या
प्तिपरिहाराय सान्त इति॥ घटादौ तद्वारणायानादीति। रूपादावतिव्याप्तिवारणायाभावत्वेति।
आत्मादावतिव्याप्तिवारणाय सादिरिति॥ अन्योन्याभावे तद्वारणाय संसर्गेति। प्राक्

व्याप्यं सामान्यं

१३५

प्रध्वंसयोरतिव्याप्तिवारणाय अनादिरनंतइति। अनादिरनंतोऽभावोऽत्यंताभावइत्यु
क्ते पुनरन्योन्याभावे गतं तद्वारणाय संसर्गेति। मिथ घटइत्युक्ते प्रागभावादावतिप्रसंग
स्ततस्तादात्म्येति। घटः पटो न भवतीति घटे पटतादात्म्यमारोप्य प्रतिषिध्यतइति
तादात्म्येति बेघरस्यार्थः। नित्यपरिमाणुरूपेत्य चभिन्नसत्वलक्षयति। नित्यत्वमिति॥
विरहो नित्यत्वमित्युक्ते नित्यत्वविरहः अनित्यत्वे [illegible] अतिव्याप्तिरतउक्तं ध्वंसेति। प्रध्वंसे
अतिव्याप्तिवारणायविरहइति। प्रध्वंसत्वं तत्प्रतियोगित्वं प्रध्वंसोपलक्षितं तस
तायोगित्वं वेत्यर्थः। परमाणुं लक्षयति। निरवयवइति। घटेऽतिप्रसंगवारणाय निर
वयवइति। गगने तद्वारणाय क्रियावानिति। मनसोऽप्यणुपरिमाणत्वेन लक्ष्यता ना
तिव्याप्तिः। यद्वा मनसो लक्षणे स्पर्शशून्यत्वेन विशेषो घ्राणादवस्पर्शवि×वे× त्वं विवक्षितं॥
निरवयवस्यावयवनिरूप्यत्वादवयवं लक्षयति। द्रव्येति। आत्मावयविघटादावति
व्याप्तिवारणाय द्रव्येति। द्रव्यकारणमित्युक्ते ईश्वरादावतिप्रसंगस्ततः समवायीति॥
दोषं सुगमं। शरीरलक्षणे अंत्यावयवित्वेपितु मुखितं। तथाप्यत्रेद्रव्यपदव्यवच्छेद्य
त्वेन प्राप्तकादेहल्ली[illegible]दीपन्यायेनोऽन्यत्रोपकोवेत्वाक्तमुद्दितं मिसदोषः। द्रव्यमेलो
वयवीत्युक्ते परमाण्वादावतिव्याप्तिस्ततः कार्येति। एवमुक्ते द्व्यणुकादावतिप्रसंगस्त
×वयविस्ता
नायतत्क्षणमाहाद्रव्येति। यद्यपुद्दिश्यानंतरलक्षणस्य वक्तव्यत्वाच्छरीरलक्षणानंतरं जोगादिवदंस्या॥ ३॥

67

तोऽन्तारंभकइति। एवं वासंभवः।। [redacted]पावयविनाशारीरादिनास्वगतरूपादेसारंभातु।।
ततोदृश्येति। दृश्यानारंभत्वमि[redacted]रूपादौगतंततोदृश्यमिति। दृश्यानारंभकेदृश्यमित्ये
केगगनादौ ततः कार्येति। प्रागभाववदिति। प्रागभावप्रतियोगिकार्यमित्यर्थः।। अन्य
थाकार्योस्यस्यनैतरं प्रागभावाभावानुप्रागभाववत्वमसंभवस्यादिति। भोगेति।। भोगा
स्यवक्ष्यमाणलक्षणस्यायतनमस्यावयवितच्छरीरमित्यर्थः।। अस्यावयविशरीरमि
त्युक्ते घटेऽतिप्रसंगः तदर्थमायतनेति। एवमप्यनिवृत्तिः। तस्यापियत्किंचिदायतनत्वादत
उक्तं भोगेति। यदातुवक्ष्यमाणलक्षणानुसार्थायतनत्वाभावः तदानैवव्याप्तिरितिसिद्धे भो
गपदं स्वरूपकथनायैवा। यदावायतनप[redacted]दमाचारमात्रवाचितदासार्थकमिति
मंतव्यं।। अथवा वक्ष्यमाणलक्षणंभोगायतनस्येतल्लक्षणेनायतनमात्रस्येति भोगपदं
सार्थकं।। भोगायतनमित्येतावत्[redacted]यतनमात्रेस्येति प्रसंगस्तदवस्थितेनेप्यात्तमिति भोगासूत्र[redacted]
नात्।। ततउक्तं भवपवीष्टि। एवं च ह्रस्तादावतिव्याप्तिरतउक्तं[redacted]अंगेति। भोगल
क्षणमाह। स्वेति। [redacted]मित्र भोग[redacted]रि। [redacted]वेते सुखदुःखे तयोरन्यतरस्य सुखस्य दुःखस्य
वा यः साक्षात्का[redacted]रः स भोग इत्यर्थः।। स्वस्मै। साक्षात्कारो भोग इत्युक्ते घटसाक्षात्कारोपि
भोगः स्यात्। अत उक्तं सुखेति। एवं दुःखसाक्षात्कारेऽव्याप्तिरतो दुःखेति एवं वासंभवः।।

मन५
×णा३
स्व३

×सु३
।।३५।।

68

सुखदुःखयोर्युगपत्साक्षात्कारासंभवात् । क्रमेण तयोः साक्षात्कारानुगमः उक्तपक्षानु न१
गतधर्मस्यैकस्याभावादत उक्तमन्यतरेति । अन्यतरत्वं तदन्यान्यत्वं उभत्रानुगतमित्यर्थः ।
सुखदुःखान्यतरसाक्षात्कारो भोग इत्युक्ते ईश्वरसाक्षात्कारेऽतिव्याप्तिरतः स्वसमवेतेति ।
ईश्वरस्य शरीराद्यभावेन तज्जन्यादृष्टाभावान्न तदधीनयोः स्वसमवेतयोः सुखदुःख
योरभावान्न तत्साक्षात्कार ईश्वरस्येत्याशयः । आयतनं स्वलक्षणमाह । यदवच्छिन्नेति ॥
येन शरीरादिनाऽवच्छिन्ने संबद्धे आत्मनि भोगो जायते तच्छरीराद्यायतनमित्यर्थः ॥ आत्म
न्यतिव्याप्तिवारणाय यदवच्छिन्न इति शरीराद्यवच्छिन्नेऽन्यत्र भोगासंभवेनाश्रोक्या
लनीति ॥ इंद्रियं लक्षयति ॥ साक्षात्कारीति । साक्षात्कारीति । साक्षात्करोतीति साक्षात्कारिय
त्ज्ञानं तस्य करणं साधकतममित्यर्थः । करणमित्युपमित्युक्ते छिदिक्रियाकरणे कु
ठारादावतिव्याप्तिरतो ज्ञानेति । एवं च धूमादिलिंगेऽप्युक्तं साक्षात्कारीति ॥ साक्षात्कारिणः
करणमित्युक्ते न कोपि दोषः । तथापि साक्षात्त्वं धर्मो विषयनिष्ठो न ज्ञाननिष्ठ इति मतांत
रसिद्धं तु ज्ञानं स्वसामानाधिकरण्यमिंद्रिय इति मंतव्यं ॥ निरासस्तु साक्षात्त्वस्य विषयनिष्ठत्वे
घटं साक्षात्करोमीति ज्ञानगतत्वेनानुभवो न स्यात् ॥ व्यवसायस्यैव तदाकारप्रसंगाच्चेति ॥
यदा साक्षात्कारिपदस्य व्युत्पत्त्या चक्षुसंयोगादावतिव्याप्तिवारणाय ज्ञानपदं भोग
[illegible] त्वपदं [illegible] आत्मन्यतिव्याप्तिरत उक्तमात्मन इति ॥ अमीनः सबंधी योगोगः

॥ नस्वत्वं॥ तथा चात्मातिरिक्तेकारत्वमित्यर्थः प्रतीयते। यथा राज्ञो धनस्वामी
पदसेनइस्रकेनराज्ञातिरिक्तप्रतीयते तदा पुत्र न स्वामी तु हदासर्थः॥ एवमपीश्वरादौ प्रसंग
स्तोऽस्माबरपेति द्रष्टव्यो। ज्ञायमान इति पाठेंद्रियादौ प्रसंगवारणाय तद्विशेषणं। ईश्व
रादेरप्येतेनैव वचनेन व्यावृत्तिः। गयववत्वे सति आत्मनोऽयोगकारत्वोपाधिर्वविषयः प्रमे
वत्वे सति आत्मनोऽयोगकारत्वोमाप्यविषय इस्मादि स्वयमूहनीयाः। तेजसानो विषय
भेदानां लक्षणमाह। पार्थिवेति। पृथिव्यादावतिव्याप्तिवारणाय पार्थिवेंधनमिति॥ इदं च
दीपकं॥ एवं चौदर्येति व्याप्तिरतो मात्रेति। तस्य चाग्नितपीतैधेनलीनन्दोषः तेजःपदाभावे
निषादस्थपतिन्यायेन कर्मधारयप्येवस्यात्तथा चास्मिन्नेवा ततो बहुव्रीहिसमासस्तानाय
तेऽपदे। निषादस्थपतिन्यायस्त्वेवं विषयो विरोधश्चैव पूर्वपक्षस्तत्रोत्तरं प्रयोजनं वक्तव्यं ५६
पूर्वसिद्धान्तपक्षयोः॥ इति पीवावयवाः। एतया निषादस्थपतिं याजयेदिति श्रूयते। तत्र संदेहः।
निषादानां स्थपतिं स्वामिनमिति षष्ठीतत्पुरुषः उत निषादश्च व नु स्थपति[illegible]ति कर्म
धारयः। तत्र पूर्वपक्षः। षष्ठीसमास एवेति। तथा च सति निषादानां स्वामी कश्चित्त्रा
प्रविघो ब्राह्मणादिर्यजनीयः। स कर्मण्यधिकारी अर्थित्वात्समर्थत्वाद्विद्वत्वाच्च। अप
पुंदत्तवाचोकर्मधारयेतु अनधीतवेदः शूद्रोऽधिकारी वाच्यः। तथा पुनः। अपशूद्रा ॥३६॥

धिकरणविशेषवादिति प्राप्ते प्रत्युच्यते। षष्ठीसमासाश्रयेतो षष्ठ्यर्थे लक्षणापत्तेः॥ लक्षणा
हि जघन्या वृत्तिः॥ न च लुप्ता षष्ठी बोधयिष्यति॥ लोपस्याभावरूपतयाऽबोधकत्वात्। क
र्म्मधारये तु न लक्षणा द्वितीयायाः श्रूयमाणत्वात्॥ सामानाधिकरण्यश्रुतेर्बलीयस्त्वाच्च।
प्रथमपदस्योपरितनापि न विभक्तिः श्रूयत इति चेन्न देहि विशेषणविशेष्य ×अ४
योरेकैव विभक्तिः श्रूयमाणोभयत्र संबध्यते। अतो नाश्रुतविभक्तिकल्पना। ततः
कर्म्मधारये। तन्मते त्वश्रुता षष्ठीकल्पनाऽतो गौरवं॥ न चाध्ययनाभावदनधि
कारो निषादस्य। एतद्विधिबलादेवैतद्विषो यावदपेक्षितपठनानुज्ञानात्॥ यथाव
र्णासुरथकारोऽग्नीनादधीतेत्यत्र। न चापशूद्राधिकरणविरोधः। तस्य निषादस्थ
पतित्व्यतिरिक्तविषयत्वेनापि पर्यवसानात्। सामान्यादिविशेषस्य बलीयस्त्वात्॥
तस्मात्कर्मधारयबलात्स्थपतिर्निषाद एवौर्ज्जिकेष्ट्यामिज्येतेति सिद्धं। पाठेनस्य ×रौद्रे४
वत्रित्वेन प्राप्तत्वात्। यज्जेतेति विज्ञप्तिपरिणामात्॥ तेजोदिव्यमिश्रकमेमौमादाव
तिप्रसंगः। अतो जलेधनमिति। एवं वौदपैगनमितउर्ममाचैति॥ शेषं पूर्ववत्॥
पर्वौकयोरुन्नयोरतिव्याप्तिवारणाय पार्थिवजलेधनमिति। सुगममन्यत्॥

71

मि०

तेजआकरजमित्यत्रेऽन्यत्र जातिप्रसंगोऽतोभिरंवनमिति। आकरजस्य स्वरूपमाह।
तद्वेति। आदिशब्दाद्रजतताम्रकांस्यत्रपुसीसादयो ग्राह्याः। औपाधिककालभेदस्य
लक्षणमाह॥ सकलेति। यौगपद्यमुत्पत्तिमित्युक्ते घटपटयोर्यौगपद्यमुत्पत्तिः स्यादत
उक्तं कारणेति द्विक्षणकारणानां मेलनेऽतिव्याप्तिरत उक्तं सकलेति॥ ननु यौगपद्यैक
थमुत्पत्तिः। तदनंतरं नाविनाडुत्पत्तेरिति चेत्। मैवं। उत्पत्त्यनंतरं ह्यात्मलाभः नवात्म
लाभ एवोत्पत्तिरतो पुनरुक्तं। यौगपद्यमुत्पत्तिरिति। यौगपद्यं लक्षयति। अनेकेषा
मिति। संबंधो यौगपद्यमित्युक्ते घटस्य संबंधेऽतिव्याप्तिरतः क्षणेति। एवं चैकस्याने
कक्षणसंबंधे गतमत उक्तं एकेति। एवमप्येकस्यैकक्षणसंबंधे गतमतोऽनेकेषा
मिति प्रसंगागतं लक्षयति। विभागेति। विभागे नानुमापको यो विभागः कर्म्म
जन्यस्य यः प्रागभावस्तेन संबद्धं यत्कर्म तेनावच्छिन्नो यः कालः स क्षण इत्यर्थः।।
कालः क्षण इत्युक्ते सकलकालस्य क्षणत्वापत्तिः। अतोऽवच्छिन्नेति। एवं च पदाहोत्रा
दावतिप्रसंगस्ततः कर्म्मेति॥ एवमपि द्वित्रेषु क्षणेषु गत अतः संबद्धेति। तथापि घट
संबद्धद्वित्रिक्षणोऽतिप्रसंगोऽतः प्रागभावेति। एवमपि घटप्रागभावसंबद्धक
र्म्मावच्छिन्नेऽतिप्रसंगः अतो विभागेति। तथापि विभागजनविभागप्रागभावसंब

॥३७॥

द्रकर्म्मावच्छिन्ने क्षणत्वानुपपत्तेऽतिव्याप्तिरतो विभागानुत्पादेति। विभागानुत्पाद
विभागप्रागभावसंबन्धः क्षण इत्युक्ते प्रागभावस्य बहुकालव्याप्तित्वात्तत्रातिव्याप्ति
वारणाय कर्म्मेति॥ एतदुक्तं भवति। विभागप्रागभावः कर्म्मणः पूर्व्वमपि वर्त्तते। कर्म्मतु
विभागोत्पत्त्यनन्तरमपैति ततः क्रियोत्पत्तिसमये विभागप्रागभावकर्म्मणोः संबन्धस्तदा
धारः कालः क्षण इति। अथवा कालोपाध्यव्यापकः कालोपाधिः क्षण इति॥ इदं लक्षणमत्रैव
स्यापि क्षणिकत्वमित्यपि प्रसंगादुक्तं। स्थितिं लक्षयति। स्थितिरिति॥ किं नदवर्त्तमान
त्वमत आह। तद्वेति। प्राक्संबद्धो योऽयं स्वस्य घटादिकार्यस्याभावस्तेन रहितं यत्स्व
रूपं तद्वत्त्वं वर्त्तमानत्वमित्यर्थः। स्वरूपवत्त्वं वर्त्तमानत्वमित्युक्ते विनाशेऽतिप्रसंगः
अतोऽभावरहितेति॥ यस्य कस्याप्यभावरहितस्वरूपवत्त्वं विनाशेऽप्यस्तीति तन्नो
वक्ति स्वेति। विनाशस्याभावान्तराभावान्न दोषः। एवं चोत्पत्तावतिव्याप्तिरतः प्राक्सं
बद्धेति। उत्पत्तिस्तु सकलकारणयौगपद्यरूपा। सा वर्त्तमानघटादेः प्रागभावस
हितैवेति न प्राक्संबद्धस्वाभावरहितेति न दोषः। वर्त्तमानत्वस्याव्याप्तेर्वा लक्षणा
न्तरमाह। स्वकार्येति॥ प्रागभावसंबद्धत्वं विनाशेऽप्यस्तीति कार्यपदं। एवमपि विनष्टो
उत्पत्तौ चातिव्याप्तिरित्यत उक्तं स्वकार्येति। स्वस्य घटादेर्यत्कार्यं॥ छ॥

रूपादितत्प्रागभाववत्त्वमित्यर्थः॥ उत्पत्तिविनाशयोस्तु स्वनिष्ठकार्याभावात् न तत्प्राग
भाववत्त्वमिति भावः॥ विनाशलक्षणं स्पष्टं॥ विभक्त्यानादिमत्त्वास्मरमात्मनो लक्ष
णं स्पष्टमिति मत्वा जीवस्य लक्षणमाह॥ शरीरेति॥ ईश्वरेऽतिव्याप्तिवारणाय शरी
रसंबंधेनेति॥ शरीरसंबंधस्य गगनादौ गतत्वात् तत्र ज्ञानवत्त्वमिति॥ प्रत्यात्मेति॥
प्रत्येकमात्मनि समवेतौ यौ धर्माधर्मौ ताभ्यामुपगृहीतत्वमित्यर्थः॥ उपगृही
तत्वं प्रत्यात्मनिष्ठत्वमित्युक्ते दृष्टोपगृहीतत्वस्यादावतिप्रसंगोऽतोऽधर्मेति॥
एवं च नरकशरीरे गतं ततो धर्मेति॥ धर्मोपगृहीतत्वमित्युक्ते देवादिशरीरेऽति
व्याप्तिस्तस्य केवलधर्मेतौ वोत्पन्नत्वात् अतोऽधर्मेति॥ धर्माधर्मयोरेवाभावात्
धर्माधर्मोपगृहीतत्वमसंभवतीत्यत आह प्रत्यात्मसमवेतेति॥ एकः सुखी अ
परो दुःखीति सुखदुःखयोः प्रत्यात्मनियतत्वात्तत्कारणत्वेन धर्माधर्मावप्यात्मन्यु
पगंतव्यावित्यर्थः॥ सितादिमृदुत्वपर्यंतानां तत्तज्जातियोगित्वमेव लक्षणं॥ जातिश्च
कपिलावृत्तिसकलसितवृत्तिगुणत्वावान्तरजातिः सितत्वमित्यादय ऊह्याः॥ सं
योगत्वेदं तल्लक्षणमिति॥ कर्मासमवायीति॥ संयोगजसंयोगेऽतिव्याप्तिवारणाय कर्मेति॥ ॥७८॥
कर्मासमवायीत्युक्ते विभागजेऽतिप्रसंगोऽतो वृत्तिसंयोगेति संयोगासमवायिकारणः संयोगस्तत्रे

पटादावतिप्रसंगः। तस्यापि तंतुसंयोगासमवायीजन्यत्वात्॥ अतः संयोगइति। संयोगइत्युक्ते कर्म्म
ण्यतिप्रसंगस्तत्र संयोगसमवायीति। एवं विभागत्वे सत्यपि तत्र फलपतनादावतिप्रसंगस्त
त्तो विभागेति। आदित्यस्य परिवर्त्तनेन तपनपरिस्पंदः। तेनोपाधियुतेति विग्रहः। दिक्कृतयो
रतिप्रसंगवारणाय दिग्भिन्नेत्यादि। आदित्यस्य परिवर्त्तनेनोपाधेर्देशादिसंयोगेऽतिप्रसं
गोऽतः परत्वापरत्वेतिदिक्॥ आदित्यसंयोगानुपाधिरूपाधिभिन्नवृत्तितत्र परत्वापरत्वे इति काल
त्वनयोरतिप्रसंगो[illegible] अत आदित्येत्यादि। बुध्यवातस्नेदानलदोयपति॥ भावनेत्यादिना।
भावनासंस्कारः सोऽसाधारणकारणं यस्य तत्तथा तच्च तत् ज्ञानं चेति विग्रहः॥ ज्ञाने स्मृ
तिरित्युक्तेऽनुभवेऽतिप्रसंगोऽतः असाधारणकारणेति। एवमनुभवावृत्तिः॥ अनुभव
व[illegible]स्यापि प्रमाऽप्रमारूपस्य गुणदोषासाधारणजन्यत्वादतिप्रसंगोऽतो भावनेति॥
भावनाव्यवहारेऽतिप्रसंगोऽतो ज्ञानेति। भावनाकारणज्ञानं स्मृतिरित्युक्ते प्रत्यभिज्ञा
प्रत्यक्षेऽतिप्रसंगोऽतोऽसाधारणेति॥ प्रत्यभिज्ञायामिंद्रियसन्निकर्षासाधारणकारणत्वे
पीति न दोषः॥ स्मृतिरूपादन्यदस्मृतिरूपं॥ घटे स्मृतेश्चातिव्याप्तिरतो ज्ञानास्मृतिरू
पपदे। प्रमात्वे सतीति विपर्ययादौ संशयादौ वातिव्याप्तिरतोऽनुभवत्वपदं। एवमप्रमात्वे सत्य
मपि। अनवधारणे निश्चयज्ञानं तदन्यदनवधारणं तच्च तद्ज्ञानं चेति विग्रहः। प्रमायामिति

75

मि०

व्याप्तिवारणायानवधारत्वेति। घटादावतिव्याप्तिवारणाय ज्ञानेति॥ ज्ञाने विपर्ययइत्युक्ते
प्रमायामतिव्याप्ति[redacted] रतोऽतत्वेति। एवं च संशयेऽतिप्रसंगोऽतोऽवधारणेति॥ अ
वधारणारूपमित्युक्ते प्रमायामतिप्रसंगोऽतोऽतत्वेति॥ अतत्वावधारणमित्येवंलक्षणी
ज्ञानपदस्य घटार्थः। अज्ञाप्रमानं करणमिद्धिपं तेन जन्यतत्वानुभवइति विग्रहः॥
तत्वानुभवः प्रत्यक्षप्रमेत्यतोऽनुमितावतिप्रसंगोऽतो ज्ञायमानेत्यादि। अज्ञायमा
नेत्याद्युक्ते इंद्रियसंयोगादौ व्यभिचारः। न तस्तत्वानुभवइति। ञोपंगतार्थप्रत्यक्षप्रमा
यामतिव्याप्तिवारणाय ज्ञायमानेति। ज्ञायमानकरणं ज्ञाब्दलिंगादि तज्जन्य इत्यर्थः॥
ज्ञायमानकरणधूमादिजन्यमत्राकमिवृत्तावतिप्रसंगस्तमस्तत्वानुभवइति॥ ञो
र्थस्सुगमं। प्रमाणत्वं लक्षयति॥ प्रमेति। अयोगोऽसंबंधः तेन व्यवच्छिन्नं रहितं यत्तत्प्रमा
णमित्यर्थः॥ एवं चेश्वरे नित्यप्रमासर्वदावर्त्तनेऽतिप्रमाऽयोगव्यवच्छिन्नः ईश्वरोपि
प्रमाणं। इंद्रियलिंगेऽपि प्रमाणेनयो व्यापारवतोः सद्भावे प्रमोत्पद्यते एवं प्रमाऽयोगव्य
वच्छिन्नत्वान्न। प्रमाव्यभिचारिप्रमाणमित्यर्थः। यद्यपि प्रमाऽयोगव्यवच्छिन्नत्वं सुखादावति
व्याप्तं तथापि साधनाश्रयोरन्यतरत्वे सतीति विशेषितमिति न दोषः। तत्रायोगव्यवच्छिन्नमि
स्मृते छिदाऽयोगव्यवच्छिन्नत्वे परत्रावतिव्याप्तमतः प्रमेति। प्रमाप्रमाणमित्युक्ते फलेऽ ॥३१॥

तिव्याप्तिरतोऽयोगव्यवच्छिन्नेति प्रत्यक्षलक्षणं सुगमं। अनुमानं लक्षयति। अनुमितीति।
प्रत्यक्षेऽतिप्रसंगस्ततोऽनुमितीति। अनुमानस्वरूपमाह। तच्चेति। व्याप्तिपक्षधर्मताभ्यां
विशिष्टं यल्लिंगं तस्यज्ञानमित्यर्थः।। अनित्यः शब्दश्चाक्षुषत्वादित्यत्र स्वरूपासिद्धेऽतिव्याप्ति
वारणाय पक्षधर्मताविशिष्टेति। अनित्यः शब्दः प्रमेयत्वादित्यत्रानैकांतिकेऽतिप्रसंगोऽतो
व्याप्तिरिति। व्याप्तिविशिष्टं लिंगज्ञानमित्युक्ते अनित्यः शब्दः सामान्यवत्वे सति चाक्षुषत्वादि
तिविशिष्टोऽव्याप्यसिद्धावतिव्याप्तिरतः पक्षधर्मतेति। व्याप्तिं लक्षयति। व्याप्तिश्चेति। यस्मिन् कस्मिं
श्चित्संबंधेऽतिप्रसंगोऽतो व्यापकस्य व्याप्याधिकरण इति। व्याप्यमधिकरणं यस्य स तथा।
साध्यस्य साधननिष्ठसंबंध इत्यर्थः। एवंच सोपाधिके मैत्रीतनयत्वादिसंबंधेऽतिव्याप्तिरतउपा
ध्यभावविशिष्ट इति। व्याप्यव्यापकशब्दाभ्यां साधनत्वसध्यत्वाभिमतौ धर्मौ विवक्षितौ।
पक्षधर्मतामाह। पक्षधर्मतेति। पक्षसंबंधः। पक्षेत्युक्ते पर्वतत्वादावतिव्याप्तिरतो व्याप्य
स्येति। व्यापकव्याप्ययोर्लक्षणमाह।। व्यापकमिति। सुगमं। उपाधिं लक्षयति। उपाधिश्चेति।।
अस्योदाहरणं। मैत्र्याः सप्तमः पुत्रः श्यामो भवितुमर्हति। मैत्रीतनयत्वात्। परिदृश्यमानमैत्री
षट्पुत्रवत्। इत्यनुमाने शाकाद्यन्नपरिणतिभेद उपाधिः। उपसमीप[illegible]साधने स्वधर्मं व्या
प्तिलक्षणमादधातीत्युपाधिरुच्यते। यथा जकुसुमं स्वसंनिहिते स्फटिके लौहित्यमादधा

77

श्री०

नास्त्युपाधि [illegible]। अत्रोपाधेर्लक्षणं प्रोच्यते। साधनस्य मैत्रीतनयत्वस्याव्यापकत्वे सति सा-
ध्येन श्यामत्वेन समव्याप्तिर्यस्य स तथा। तथा च यत्र यत्र श्यामत्वं तत्र तत्र शाकाद्यन्नपरिणामः।
यथा विज्ञाततनये श्यामे। तथा यत्र यत्र शाकाद्यन्नपरिणामः तत्र तत्र श्यामत्वं यथा तत्रैव वि-
ज्ञाततनये इति समव्याप्तिः। यथा यत्र यत्र मैत्रीतनयत्वं तत्र तत्र शाकाद्यन्नपरिणाम
इति न व्याप्तिः। पक्षीकृते मैत्रीपुत्रे शाकाद्यन्नपरिणतेरनिश्चयात्। ततोऽयमुपाधिः। व्याव-
त्तिस्तु साधनाव्यापक उपाधिरित्युक्ते अनित्यः शब्दः कार्यत्वात् घटवदित्यत्र सदनुमा-
ने सावयवत्वमुपाधिः स्यात्। तन्निवृत्त्यर्थं साधनाव्यापक॥ यद्यत्कार्यं तत्तत्सावयवमिति
व्याप्तेः कर्मादौ व्यभिचारात्। अत उक्तं साध्याव्यापकमिति। एवं च तत्र नास्ति व्याप्तिः। सावयव-
त्वस्य साधनाव्यापकत्वेऽपि साध्याव्यापकत्वाभावात्। यद्यदनित्यं तत्तत्सावयवमिति सा-
ध्यव्याप्तेर्गन्धादौ व्यभिचारात्। अतः सावयवत्वं कार्यत्वे नोपाधिः। साध्यव्यापक उपाधि-
रित्युक्ते पूर्वस्मिन्नेवानुमाने प्रमेयत्वमुपाधिः स्यात्। यदनित्यं तत्प्रमेयमिति साध्य-
व्याप्तेः सत्त्वात्। अत उक्तं साधनाव्यापकत्वे सतीति। एवं चेन्नास्ति व्याप्तिः। यत्कार्यं तत्प्रमेयम-
पि न भवति साधनाव्यापकत्वाभावात्। प्रत्युत यत्कार्यं तत्प्रमेयमिति। साधनव्याप्तेरेव
सत्त्वात्। अतः प्रमेयत्वे नोपाधिः। साधनाव्यापकत्वे सति साध्यव्यापक उपाधिरित्युक्ते ॥४०

पर्वतस्तु मानेनैव ज्ञाच्छेतरत्वमुपाधिः स्यात् । तस्य यावत्कार्यं तत्सच्छेदेतरदिति व्याप्तेः ज्ञाच्छे
पदे एवं व्यावृत्तिवारेण साधनाव्यापकत्वात् । यदनित्यं तत्सच्छेदेतरदिति साध्यव्यापकत्वाच्च ॥
ननूक्तं समेति । साध्यपुरःसरा उपाधिपुरःसरा च व्याप्तिर्यस्य स समव्याप्तिः । यथा शाका
द्यन्नपरिणतिः । नोच्छेतरत्वे तु पक्षेपि साध्यपुरःसरा व्याप्तिरस्ति तथापि पक्षेच्छेदेतर
त्वे दर्शितस्यामित्युपाधिपुरःसरा व्याप्तिर्नास्ति । आकाशे व्यभिचारात् । अतो समव्याप्तेर
भावान्नायमुपाधिः । साध्यसमव्याप्तिरिष्यते ऽभिमतोपाधिर्वी सावयवत्वादित्यत्र च सकर्तृकत्व
मुपाधिः स्यात् । साध्यसमव्याप्तत्वादत उक्तं साधनाव्यापकत्वे स~~व~~तीति । सकर्तृकत्वं
सावयवत्वव्यापकमिति साध्यं न व्यापकमतो नोपाधिः । ननु उपाधिः कथं हेत्वाभासः ॥
व्याप्तिपक्षधर्मतयोरन्यतरस्याविघटनात् । यथा विरुद्धज्ञाने कोटिकाभ्यां व्याप्तिवि
घटते । तथा न शाकाद्यन्नपरिणामसद्भावमात्रेण मैत्रीतनयत्वश्यामत्वयोर्व्या
प्तिर्विघटिता भवति । न अन्यस्य साध्यव्यापकत्वसाधनाव्यापकत्वेनान्यस्य साध्य
व्याप्यत्वविघटकेऽतिप्रसङ्गात् । नाप्यसिद्धकालात्ययापदिष्टवत् पक्षधर्मता विघटते ।
उपाधिसत्वेपि मैत्रीतनयत्वहेतोः पक्षनिष्ठत्वात् । अतो नायं दोष इति चेत् । मैवं । व्यभि
चारोन्नायकत्वेनोपाधेर्दोषात् । तथाहि ॥ साध्यस्य व्यापक उपाधिः पक्षाद्यावर्त

79

५७०

मानः स्वव्यापी साध्यमादाय व्यावर्त्तते ॥ व्यापकनिवृत्तौ व्याप्यनिवृत्तेरावश्यकत्वात् ॥ तथा च साध्याभाववति पक्षे विपक्षरूपे वर्त्तमानो हेतुर्व्यभिचारी भवति । तदुक्तं व्यभिचारान्नयं कुर्वन्नुपाधिर्याति दोषतामिति ॥ व्यभिचारोन्नयनं चाश्रये हेतुः साध्यव्यभिचारी साध्यव्यापकोपाधिव्यभिचारित्वात् । यो यद्व्यापकव्यभिचारी स तद्व्याप्यव्यभिचारी । यथा पृथिवीत्वव्यापकद्रव्यत्वव्यभिचारी गुणत्वादिः पृथिवीत्वव्यभिचारीति सामातः विशेषतस्तु मित्रापुत्रत्वं श्यामत्वव्यभिचारि । शाकाद्यन्नपरिणामत्वेन व्यभिचारित्वात् । प्रमेयत्ववदिति ॥ विपक्षे बाधकस्तर्कः शाकाद्यन्नपरिणामजन्यश्यामत्वयोर्वैद्यके शास्त्रादेव कार्यकारणभावावगमात् । कारणाभावे कार्यश्यामत्वासंभवः पक्षे स्ते मित्रापुत्रे शाकाद्यन्नपरिणतेरनिश्चयेऽपि साधनव्यापकत्वसंदेहाद्भवत्येव संदिग्धोपाधिः । एवं निषिद्धत्वाभावत्वार्द्रेन्धनत्वादयो ज्ञेयाः ॥ इत्यलं विस्तरेण । केवलान्वयिहेतुं लक्षयति ॥ पक्षव्यापक इति । पक्षव्यापकः केवलान्वयीत्युक्ते केवलव्यतिरेकिण्यतिप्रसंगस्तदर्थं सपक्षस्पर्शीति । एवमुक्ते च मानुमानेऽन्वयव्यतिरेकिण्यतिव्याप्तिरतो विपक्षशून्य इति ॥ विपक्षशून्य इत्येवोक्ते सर्वक्षाणिकेमत्वादिमनध्यवसितेऽतिव्याप्तिरतः ॥४९॥

80

सपक्षस्य सत्त्वीति॥ विपक्षशून्यः सपक्षसत्त्वी इत्युक्ते शब्दोऽभिधेयश्चाक्षुषत्वात् घटवदित्यत्रा-
तिप्रसंगः तावन्ति पक्षव्यापक इति। चाक्षुषत्वस्य पक्षनिष्ठत्वाभावान्न दोषः व्यापकपदेनैवा-
भिधेयः शब्दो वर्णात्मकत्वादिति॥ भागासिद्धोपि व्युदस्तः। एतत्त्रितयोक्तौ वह्निरनुष्णः पदार्थ-
त्वादिति बाधितेऽतिव्याप्तिरतोऽबाधितविषय इति। एवमभिधेयः शब्दः प्रमेयत्वात्। अनभिधेयः
श्रावणत्वात्। व्यतिरेकेण घटवदिति सत्प्रतिपक्षेऽतिव्याप्तिरतोऽसत्प्रतिपक्ष इति। केवलव्य-
तिरेकिणो लक्षयति। पक्षव्यापक इति। विपक्षाद्व्यावृत्तः केवलव्यतिरेकीत्युक्तेऽन्वयव्यतिरेकि-
तिप्रसंगोऽतः शून्य इति एतदुक्तौ वेदः सर्वज्ञकर्तृजन्यः चाक्षुषत्वात्। यः सर्वज्ञकर्तृको न
भवतिय ×सपक्ष× था आत्मा। ततः पक्षव्यापक इति। पक्षव्यापकत्व इत्युक्ते केवलान्वयिनि
प्रसंगोऽतः सपक्षशून्य इति। एतद्द्वयोक्तौ सर्वमनित्यं सत्त्वादित्यत्र प्रसंगोऽतो विपक्षाद्व्यावृत्त इति॥
ऽयं तु विपक्षाभावान्न विपक्षाद्व्यावृत्तः। विपक्षाभावश्च सर्वस्य पक्षीकृतत्वात्॥ एतद्
त्रयोक्तौ सर्वं कार्यं प्रधानजन्यं कार्यत्वादित्यत्र प्रत्यक्षादिबाधितेऽनुमाने प्रसंगोऽतोऽबा-
धितविषय इति। एवमपि सर्वं कार्यं सर्वज्ञकर्तृजन्यं कादाचित्कत्वात्। व्यतिरेके गगनवत्।
सर्वं कार्यं सर्वज्ञकर्तृजन्यं न भवति प्रमेयत्वाद् गगनवदिति सत्प्रतिपक्षे प्रसंगोऽतोऽसत्प्र-
तिपक्ष इति॥ अन्वयव्यतिरेकिणो लक्षयति॥ पक्षेति॥ पक्षव्यापक इत्युक्ते केवलव्यतिरे

81

मि०

क्षितिः प्रसंगोऽतः पक्षस्पर्शीति॥ एतद्द्वयोक्तौ केवलान्वयिनि गतमतो विपक्षाद्व्यावृत्त इति॥
केवलान्वयिनि विपक्षाभावान्न तद्व्यावृत्तिः॥ विपक्षाद्व्यावृत्त इत्युक्ते पुनः केवलव्यतिरेकिणि
अतः सपक्षस्पर्शीति॥ एवंद्वयोक्तौ अनित्यः शब्दः बुध्यानुपत्वे सति सामान्यवादिति॥
असिद्धभेदगमनतो पक्षव्यापक इति॥ एतद्द्वयोक्तौ पर[illegible]माणबोधितसामर्थ्यत्वाद्दुष्ट
वदिमन्वयव्यतिरेकिणि धर्मिग्राहकमानबाधितेऽतिप्रसंगोऽतोऽबाधित इति॥ एवमपि
शब्दोऽनित्यः कार्यत्वान्नित्यः शब्दः श्रावणत्वादिति सत्प्रतिपक्षेऽतिप्रसंगोऽतोऽसत्प्रति
पक्ष इति॥ पक्षव्यापकत्वादि सामान्यपक्षादिलक्षणमाह। संदिग्धेति। संदिग्धसाध्यं
यस्य तस्य भावस्तत्त्वं तेनेत्यर्थः तल्लक्षणो हेतौ या। संदिग्धसाध्यवानुपपन्नपक्ष इत्यर्थः॥
गुणवत्त्वं घटादावनित्यव्याप्यमतो विशिनष्टि साध्यवत्तेति। एवं च सपक्षेऽतिव्याप्तिः नस्या
दिसाध्यवत्त्वं नोपपन्नत्वान्। इत्थंभावे तृतीयामस्तु वर्थस्योन्नत्वान्। अतः संदिग्धेति। संदि
ग्धेनोपात्तत्वं स्यात् एवादावति प्रसक्तमतो वह्निसाध्यकेति॥ अधिकरणत्वं सपक्षत्वे
निश्चिते विपक्षे यस्य कस्याप्यधिकरणेऽतिप्रसंगोऽतः साध्येति। एवं च पक्षे गतमतो
निश्चितेति निश्चितं यत्साध्यं वह्निमत्त्वादि तस्याधिकरणमाधारः सपक्ष इत्यर्थः॥ ॥४२॥

82

निश्चितत्वेन साध्यानधिकरणं वेति विग्रहः। अनधिकरणमित्युक्तेऽसंभवः। विपक्षस्या-
पि यत्किंचिदधिकरणत्वात्॥ अतः साध्येति। एवमनुमे वह्निमान्पर्वतः धूमवत्त्वादिति प्रयोगे
महाह्रदेऽपि यत्र कदाचिद्वह्निमत्त्वमस्ति न वेति संदेहस्तदा तस्य विपक्षत्वं नास्तीति नव्याप्तिव्या-
प्तिः तदर्थं विनिश्चितेति॥ पक्षादीनां त्रयाणामपि तत्त्वेनानिश्चितानामेवानुमितिजनकत्वान्नु
साध्याभाववत्त्वेन निश्चितत्वं विपक्षस्वरूपं॥ अर्थरूपमानं स्वार्थं शब्दरूपमानं परार्थ-
मित्यर्थः॥ एवं चावयवोपपन्नत्वं शब्दरूपत्वं। ननु शब्दो नानुमानं। लिंगानु×मन्तु×संधान
व्यतिरेकेणाप्रमाजनकत्वात्। प्रत्यक्षवदित्याशंक्याह। शाब्दस्यापीति। शाब्दस्याप्यनुमा-
२१ नत्वं कुतः। अनुमानविषयत्वेनाविनाभावोपजीवकत्वेनेत्यन्वयः॥ अनुमानविषयः प-
रोक्षं स एव विषयो यस्य शाब्दस्य तस्य भावस्तत्त्वं तेनेत्यर्थः। हेतौ तृतीया। तथा च शाब्दो-
ऽनुमानं प्रमाणत्वे सति परोक्षविषयत्वात् अनुमानवदित्यर्थः॥ यथा शाब्दोऽनुमानं
अविनाभावोपजीवकत्वादनुमानात्॥ अविनाभावमुपजीवतीत्यविनाभावोपजीवकः॥
कथमिति चेत्॥ इष्टौ अग्निहोत्रं जुहुयात् स्वर्गकाम इत्यत्रैतानि स्वस्मारितार्थसंसर्गज्ञानपूर्व-
काणि। आकांक्षायोग्यतासंनिधिमत्पदकदंबकत्वात्। गामानयेत्यादिपदकदंबवत्॥
पदार्थसंसर्गो वाक्यार्थः। स चाविनाभावबलेनैव लिंगरूपेण शब्देनावगतः॥ अतः शाब्दो-

नुमानमित्यर्थः॥ तथा च लिंगरूपेणैव शब्दस्यार्थगमकत्वानुपूर्वपदे हेतुरसिद्ध इति द्रष्टव्यः॥ प्रतिज्ञादीनां लक्षणमाह॥ तत्रेति॥ वचनं प्रतिज्ञेत्युक्ते वचनेऽतिप्रसंगोऽतो वसि पक्षेति॥ पक्षधर्मत्ववचनं हेतुरित्युक्ते पर्वतो वह्निमानिति साध्यस्य पक्षधर्मतावचनेऽगतमतो लिंगस्येति॥ शेषं पूर्ववत्॥ प्रतिज्ञादावतिव्याप्तिवारणाय दृष्टांतेति॥ एवं च यथा गौस्तथा गवय इत्यादौ प्रसंगस्ततोऽनुमानाव[illegible] वेत्ये। समतीति प्रकरणाज्ज्ञातव्यं॥ लिंगस्येति वानुषंजनार्थं॰ परामर्शस्तृतीयलिंगज्ञानं॥ वह्निव्याप्यधूमवानयमित्यादि॥ यावत्तिःस्पष्टा॥ लिंगसंबंधेन तस्मादित्येवंरूपेण प्रयुक्तेनिश्चितसाध्यवत्त्वं निगमनमित्यर्थः॥ प्रतिज्ञायाम[illegible]मतिव्याप्तिवारणाय निश्चितेति॥ दृष्टांतेऽतिप्रसंगनिवारणाय लिंगसंबंधेति॥ उपनयेऽतिव्याप्तिवारणाय निश्चितेत्यादि॰ प्रयुक्तत्वं समभिव्याहृतत्वं॥ हेत्वाभासलक्षणं प्रतिज्ञागवैकल्प्यमिति॥ अंगानि पक्षधर्मतादीनि तैर्वैकल्यं तद्रहितत्वमित्यर्थः॥ अनिश्चितत्वं स्वात्वादावप्यस्तीति तद्वारणाय पक्षधर्मत्वेनेति॥ क्वचिल्लिंगत्वेनेति पाठः॥ तत्रापि पक्षधर्मतयेत्यर्थः॥ पक्षोऽपि पक्षस्य वृत्तित्वमनैकांतिकेऽप्यस्ति तदर्थमात्रेति॥ अनैकांतिकानध्यवसितप्रकरणसमानां

॥४३॥

सीदेहकार्यकर्तृत्वेन संदिग्धव्यपदेशीं विधाय त्रितयं युगपदेव लक्षयति ॥ साध्येति ॥
साध्यं च साध्याभावश्च तौ साध्यौ यस्य स साध्यतदभावः साध्यस्तस्य भावस्तत्वं । वि
रुद्धे सदनुमाने वातिव्याप्तिवारणाय त्रयसाध्यत्वमुक्तं । तच्च प्रमेयत्वस्यामैक्षीति
कस्य साध्यतदभाववत्त्वनिश्चितेनोक्तयस्य धर्मसंग्रे न वा तु । अनध्यवसितस्य पक्षमा
त्रवृत्तित्वेनोक्तयसाधनसंग्रे न वा तु । प्रकरणसमस्य साध्यतदभावयोः समत्वेनोक्तयसाधन
संग्रे न वा तु ॥ त्रयाणामुक्तयसाधनत्वं ॥ अन्यतरानिर्णयाभावादेकसंदिग्धत्वं ॥ अपरं च स्वयम
हनीयं विस्तरभयान्नोच्यते ॥ [illegible] वितत्वैक्षीति कानध्यवसितयोः पृथग्लक्षणं दृश्यते ॥ तदा
स्वासंग्घत्वं तद्राद्धेन सत्प्रतिपक्ष एव ग्राह्यः ॥ पूर्वपाठ एव तु सार्वत्रिकः ॥ टीकाकारसंमतश्चेति ॥
बाधं लक्षयति ॥ उपजीव्येति ॥ उपजीव्यनाधिबलेन प्रमाणेन निश्चितः साध्यविपरीतः साध्या
भावो यस्य तस्य भावस्तत्वं ॥ तत्कालाभयापदिष्टत्वमित्यर्थः ॥ साध्यविपरीतत्वं संदिग्धेपक्षे
पक्षस्तीति सदनुमानेऽतिव्याप्तिवारणाय निश्चितेति ॥ ह्रदेजात्यादिना निश्चितसाध्यविपर्य
ये सदनुमानेऽतिव्याप्तिवारणाय प्रमाणेति ॥ सम्प्रति पक्षेऽतिव्याप्तिवारणायोपजीव्येति ॥
तर्कं लक्षयति ॥ अनिष्टेति ॥ अनिष्टस्य व्यापकधर्माभावादिरूपं तस्य संजननं तर्क इत्यर्थः ॥
स्ववारस्वमपिको रहूयादिमतादुष्टा यामतिव्याप्तिवारणाय व्यापकेति ॥ महाहृदेवी

85

र्गा क्षित्यादिप्रसंजनेऽतिव्याप्तिवारणाय निषेधेति॥ प्रसंजनेल्लक्षयति॥ तुल्यत्वेनेति॥ तुल्यत्वं समानक-
वच्छिन्नमिति॥ अभावयोर्व्याप्तिमत्त्वमिति यावत्॥ यत्र यदा वह्निर्नास्ति तत्र तदा धूमोऽपि नास्तीति प्रती-
तेः॥ एवं चाभावयोर्मध्ये तुल्यत्वेन हेतुनायमुत्तराभाववचनं प्रतिकूलाभाववचनं तत्प्रसंजन-
मित्यर्थः॥ पूर्वभाववचनमित्युक्ते यदि सुखी तर्हि दुःखं नेति वचनेऽतिव्याप्तिरतोऽभावयोरिति॥
एवमुक्ते यद्यघनाग्नित्वं स्यात्तर्हि निर्जलत्वं न स्यादिति वचनेऽतिप्रसंगस्ततस्तुल्यत्वेनेति॥ व्याप्या-
नाकारोपे व्यापकाभावारोपः प्रसंजनमिति रहस्यं॥ अभावयोः प्रसभाववचनमित्येवं बाह्य-
व्याप्तिप्रायेण वस्तुतस्तु यदपीतं जलं परं तमन्तरधत्ते तर्हि तदविशिष्टमामपि दहेदित्यादावभा-
वयोरपि प्रसंजनस्येष्टत्वादिति॥ स्वप्नं लक्षयति निद्रेति॥ निद्रादोषेण दुष्टं यदन्तःकरणं मनस्त-
ज्जन्यं ज्ञानं स्वप्न इत्यर्थः॥ जागरे घटादिज्ञाने व्युदासायांतःकरणेति॥ जाग्रत्सुखादिज्ञान-
व्युदासाय दुष्टेति॥ मग्नध्यानस्य भ्रमव्युदासाय निद्रेति॥ कथं निद्रा नामेत्यत आह योगजेति॥
योगाभ्यासेन जनितो धर्मो योगजस्तेनानुगृहीतस्यासहस्तस्य मनसो निरिन्द्रियप्रदेशे
बाह्येन्द्रियसंबंधरहितेस्थले वर्त्तनं निद्रेत्यर्थः॥ समाधावतिव्याप्तिवारणाय योगजध-
र्मानुगृहीतस्येति॥ ग्रहणं निर्विकल्पकमित्युक्ते भ्रमेऽतिप्रसंगोऽतो वस्तुपदं॥ एवं च सवि-
कल्पकप्रमार्थमतो मा चेति इन्द्रियादौ प्रसंगवारणाय ग्रहणमिति॥ निर्विकल्पकेऽतिव्याप्तिवार-
णाय विशिष्टपदं॥ वस्तुग्रहणं प्रमामिति लक्षणेऽनिज्ञायामतिप्रसंगोऽतोऽनीतेत्यादि॥ उत्तरलक्षणे ॥४४॥

ताव्यं सुगमं ॥ कुहनमुहृ इतिव्युत्पत्त्यैव हेतुलक्षणप्रवृत्तिरिति मत्वाऽनध्यवसायं लक्षयति ॥
अनालिंगितेति ॥ अनालिंगितेऽस्पष्टे रूपे येकोटायस्यानवधारणं ज्ञानं स्यात् दनध्यव
सायइत्यर्थः ॥ अनवधारणं ज्ञानमन्धकारे सुपुरुषसंदेहेऽतिव्यापकमतोऽनालिंगितेत्यादि ॥
सुखं भेदो लक्षयति प्रयत्नोग्राह्येति ॥ प्रयत्नो साधसोधनेस्त्रकुंदनादितदधीनेतज्जन्य
मित्यर्थः ॥ सुखं स्वासाहिकमित्युक्ते परान्तिमतेऽनित्यसुखेऽतिप्रसंगोऽतः साधनाधीनेति ॥
एवमुक्ते स्वर्गे गतमतः प्रयत्ने पीडकामात्राधीनं वतत्साधनं चेति विग्रहः ॥ साधनस्याप्य
वंइत्तास। धनस्याप्यवैवासं साहिकेप्यस्तीति तद्वारणाय माचेतिऽवलंभेदं लक्षयति ॥
सोपक्रियकत्वमिति ॥ सुगमं लक्षणद्वयं ॥ उद्भवत्वमिलक्षयत्रापि संबंधनीयं ॥ अतो गगना
लौकयोर्न प्रसंगः ॥ वेगभावनालक्षणे सुगमे ॥ स्थितस्थापादको गुण इत्येवं ॥ स्थितिस्थापादक
संस्कारत्वस्य परमिति विभज्य स्थितिस्थापकस्य लक्षणद्वयं द्रष्टव्यं ॥ रूपेऽतिव्याप्ति
वि३ वारणाय गुण इति संस्कार इति वा विशेषणीयं अनुत्वापादकः [illegible] संस्कारस्थितस्थाप
क इति द्रष्टव्यं ॥ सत्तु वेष्टनलक्षणकेऽव्यापक इति नुपलक्षणीयः ॥ तस्मात्स्थितिस्थापा
दको गुणः संस्कारः स्थितस्थापक इत्येवं लक्षणे दर्यावसानेन द्रष्टव्यं ॥ अव्याप्यात्तरसंसा
[illegible] म[illegible] काः ॥ नित्यलक्षणानि स्वरूपानिरूपणेनैव द्रष्टव्यानि गुणानुक्तेम व्यापकत्वादिना

लक्षयति ॥ अव्यापकत्वमित्यादिना ॥ समानोदेशोपस्य तस्य भावे सोदेश्यं एकनिष्ठसमिति यावन्नू ॥
सादेश्ये रूपरसादौ वर्त्तत इत्सभावेति ॥ पूर्वाभावस्यादेश्यं परत्वस्य वर्त्ततावेति भ्रतदुक्तं स्वेति ॥
एकस्मिन्नेव तरावेकुत्तो संयोग तादृशो मौ वर्त्तते इति संयोगोऽव्यापकः ॥ एवं विभागसुखादिष्व
प्येषु दृष्टव्यं ॥ व्यापकत्वं सुगमं ॥ विहितादित्रयं सुगममेव व्याख्यापाद्यांतोमाह ॥
निर्बाधकमिति । बाधकं तु व्यक्तेरभेदस्तुल्यत्वं संकरोऽथानवस्थितिः रूपहानिरसंबंधो
जातिबाधकसंग्रहः इति किरणावली तावतीकाशे नो व्यक्तेरभेद आकाशादौ तुल्यत्वं घटकलश
करत्वादौ । संकरो भूतत्वमूर्त्तत्वादौ । भूतत्वं मूर्त्तत्वं परिहायाकाशे वर्त्तते मूर्त्तत्वं च भूतत्वं परि
हाय मनसि वर्त्तते । तदुभयं पृथिव्यादिचतुष्टये वर्त्तत इति परस्पराभावसमानाधिक
रणयोर्धर्मयोः सामानाधिकरण्यलक्षणं सांकर्यं भूतत्वमूर्त्तत्वयोर्वर्त्तत इति । तदुक्तं ॥ अन्योन्य
परिहारेणाप्यव्याप्तिनिवेशिनोः सामान्ययोः समावेशो जातिसंकर उच्यत इति ॥ अ
त एव तदुभयमुपाधिरूपं सामान्यं । अनवस्थितिर्जातौ जात्यंगीकारः रूपहानिर्विशेष
त्वादौ । असंबंधः समवायत्वादौ । समवाये समवायानंगीकारात् । एवं षड्विधजातिबाधकाभा
वे च सामान्यं सा जाति । बाधकत्वे उपाधिः सामान्यमित्यर्थः ॥ अथ कारणं लक्षयति ॥ आरोपि
तेति घटपटभावेऽपि व्याप्तिवारणाय नीलरूप इति । एवं समसमन्वः । ननु आरोपितेति ॥ आरो ॥४५॥

पितत्विति। रूपे घटकारदसत्वे आमोविततिरूपस्पर्शादिकादावति व्याप्तिरतोऽआवद्रति॥ स्मानसंबं
धे लेस्यपति॥ आत्मेति॥ आत्मतालेन तीली नसंबंधान स्यलेस्ताती ज्ञानविषयत्वमित्यर्थः॥
स्तानविषयत्वप्रसंगे नप्रमाविषयत्वेलक्षणयति। नत्व ज्ञानेति॥ अवच्छेदकत्वे व्यावर्त्तकत्वे॥ विनी
शत्वं विषयत्वमिति यावत्॥ मुक्ति विषयसंसर्गत्वमविषयेऽतिव्याप्तिवारणाय तत्वज्ञानेति॥
यथासंख्याया एवगुणत्वमेन संख्यागुणान्तरभावे गुणादौ कथं तद्यवहार इत्यत आह॥
गुणादिष्विति॥ संख्यायाः स्वरूपया गुणादीनां प्रत्यासत्तिरेकार्थसमवायत्वलक्षणा तन्निबं
धनत्वकारणकमित्यर्थः। प्रत्यासत्तिः संबंधः॥ यद्वा संख्यायप्रत्यासत्तिः उपसंहरति। अतए
वेति॥ व्यवहारस्य त्विशेषः॥ अतएव औपचारिकोदेवेत्यर्थः। कारणलक्षणयति॥ कार्येति॥
उत्पत्तेः स्थापक्षस्तत्कार्यपदं॥ कार्योपदत्वं समवायिकारणमितरत्वे निमित्तादृष्टादौ गमत्वेन स्व
समवेतेति॥ अवच्छेदनिश्चितसामर्थ्यं यस्य न तथा एवं विधं वतत्समवायिकारणप्र
त्यासन्नमेवेति विग्रहः॥ अवच्छेत्याद्युक्तौ समवायिकारणे गतमतः समवायिकारणप्र
त्यासन्नमिति॥ एतावन्मात्रोक्तौ पटप्रतितन्तुरूपादेरपि असमवायिकारणत्वप्रसंगमत
व घटतेति॥ समवायिकारणप्रत्यासन्नत्वं द्विधा कार्यकारणैकार्थसमवायान्॥ तत्र कार्यैका
र्थसमवायो यथा तंतुसंयोगस्य पटे वैकार्थसमवायः॥ कारणैकार्थसमवायो यथा तंतु

मि०

रूपस्य पटरूपसमवायिकारणेन पटेन तंतुसमवायः ॥ निमित्तकारणस्य लक्षणं स्पष्टं। मू
र्त्तत्वं लक्षयति ॥ मूर्तेति ॥ इयत्तापरिछेदः। अविभुत्वमिति यावत् ॥ तेनावछिन्नो यः परिमा
णो तेन योगीत्यर्थः ॥ आकाशपरिमाणेऽतिव्याप्तिवारणाय इयत्तावछिन्नेति ॥ अमूर्तल
क्षणं स्पष्टं। कारणप्रसंगात्सामग्रीं लक्षयति ॥ कार्येति ॥ कार्यस्यायोगव्यवछिन्नः।
अव्यभिचारस्तद्वती सामग्रीत्यर्थः ॥ सर्वलक्षणमूलभूतमुद्देशं लक्षयति ॥ संज्ञेति ॥
लक्षणेऽतिप्रसंगवारणाय संज्ञामात्रेति ॥ एवमुद्देशो लक्षणे किंचित्साधर्म्यं वैधर्म्यं
च दर्श्यन् गुणादीनामाश्रयमाह (कर्मेति ॥ मूर्तद्रव्याणामेव) रूपेत्यादिना ॥ पृथिवु
दकात्मनो चतुर्दशगुणवत्वं। तेजस्येकादश गुणाः। वायोर्नवगुणाः। ईश्वरमनसो
रष्टौ गुणाः। गगने षड्गुणाः। दिक्कालयोः पंचगुणा इति ॥ इदमेववतद्वतासाधर्म्यं ॥ अ
न्यापेक्षया च वैधर्म्यं। कर्माश्रयमाह ॥ कर्मेति ॥ मूर्तद्रव्याणामेवतत्साधर्म्यं ॥ इतरापेक्ष
या च वैधर्म्यमित्यर्थः। इतरेषां चेतदभाववत्वं। निष्कूपत्वं साधर्म्यं फलितं तेनैव लि द्रव्या
दीनां त्रयाणां साधर्म्यमाह ॥ सामान्यमिति ॥ इतरेषीति सामान्यं साधर्म्यमुक्तं भवति ॥
विशेषाणां साधर्म्यं वैधर्म्यं चाह ॥ विशेषा इति ॥ समवायाभावयोर्वैधर्म्यमाह ॥
समवायेति ॥ कार्यद्रव्यसाधर्म्यमाह ॥ द्रव्यत्वेति ॥ अकार्यद्रव्यसाधर्म्यमाह। अकार्येति ॥ ॥४९॥

द्रव्यादीनां विनाशं निरूपयति ॥ विनाशस्त्विति ॥ समवायिनाशात्तु द्रव्यनाशो यथा तंतुना
शात्पटनाशः ॥ असमवायिकारणनाशात्तु द्रव्यनाशोय — ये था परमाणुसंयो
गनाशात्तु द्व्यणुकनाशः ॥ गुणस्य विनाशं निरूपयति ॥ गुणस्येति ॥ द्वित्वे ॥ अस्मान
स्य कारणपदस्य प्रत्येकमभिसंबंधः ॥ समवाय्यसमवायिनिमित्तकारणनाशाच्चवि
रोधिगुणाच्चेति द्वंद्वः ॥ घटादिगतरूपादीनां समवायिघटादिनाशान्नाशः ॥ असमवा
यिकारणनाशाद्द्रव्यनाशः ॥ संयोगविभागयोरसमवायिकारणयोर्नाशात्तु संयोगजसं
योगविभागजविभागयोर्नाशः ॥ अपेक्षाबुद्धिनिमित्तकारणनाशात्परत्वापरत्वद्वि
त्वपृथक्त्वादीनां नाशः ॥ उत्तरशब्देन विरोधिना पूर्वशब्दस्य उत्तरज्ञानेन पूर्वज्ञानस्य
दुःखादिना सुखादेर्नाश इति विरोधिगुणस्य ॥ कर्मणो नाशमाह ॥ कर्मणइति ॥ सम
वायिनाशाद्यथा विनश्यदवस्थागतं कर्म ॥ असमवायिनाशाद्यथा शरवेगनाशात्
तद्गतकर्मनाशः ॥ उत्तरसंयोगाद्यथा शरादेः क्रियाजन्यउत्तरकर्मनाशः ॥ अ
भावस्य विनाशमाह ॥ प्रागभावस्येति ॥ अन्योन्याभावः केषांचिन्मते नित्यः ॥ यद्यपि
नहि घटे नष्टेऽपि तदन्योन्याभावो नश्यति ॥ तदा हि नष्टघटस्य पटतादात्म्यापत्ते:॥

अन्यो[illegible]भावस्य तादत्म्याभावरूपत्वात् ॥ तथापि तत्प्रतियोगि विनाशेऽपि विनश्यतीत्य
नुपेयं गुणमभिनिरूपयति ॥ उत्पन्नस्थितीति ॥ गुणस्येयं तत्त्वं ॥ गुणत्वस्येति ॥ समानजा
तीयं तु रूपादि घटादि रूपस्यासमवायिकारणं ॥ असमानजातीयं द्व्यणुकपरि
माणं प्रति परमाणुद्वित्वं सुखादिकं प्रत्यात्ममनःसंयोगः ॥ संयोगविभागवेगानां
च कर्म्मासमवायिकारणं ॥ साधारणनिमित्तकारणमाह ॥ निमित्तेति ॥ आदिशब्देन
कालेश्वरेच्छादि ॥ अभावस्योत्पत्तिमाह ॥ अन्योन्याभावेति ॥ अभावस्य कापि समवा
य्यभावान्नासमवायिकारणं तदभावादेव तत्पूत्वासन्नत्वलक्षणं ॥ समवायिकार
णमपि नेति केवलं निमित्तादेवोत्पत्तिरित्यर्थः ॥ अन्यतमाभावप्रागभावयोर्न्नोत्पत्तिः ॥
घघपन्योन्याभावस्य नोत्पत्तिः ॥ न हि घटरूपप्रतियोग्यनुत्पन्नावन्योन्याभावो नास्ति ॥
तथाप्यवसत्यनुत्पन्नो घटः पटो न भवतीति प्रसत्यानस्यात् ॥ तथापि घटे उत्पन्ने अय
मयं न भवतीति स्पष्टं स्यात इति तदनुसारेणोत्पत्तिरुक्ता ॥ ननु अभावो नाम कश्चि
त्पदार्थोऽस्ति येन तस्योत्पत्तिविनाशौ क्रियारः कर्त्तव्यौ भवेतां ॥ तथाह प्रभाकरः ॥
भावान्तरमेवाभावोऽन्तरापेक्षया अभाव इति व्यवह्रियते ॥ परन्तु न व्यवहारविषयः
च पदार्थान्तरमस्ति मानाभावात् ॥ नास्तीति प्रमयो नास्तीति व्यवहारान्यथानु

पपत्तिर्वीतत्रमानमिति चेन्न ॥ अप्रत्यक्षस्यार्थापत्तेश्च भूतलादिभावालंबनयाऽ-
न्यथासिद्धत्वात् ॥ ननु नास्तीति प्रत्ययपूर्वपदेऽयोग्योर्थः तत्कालालंबनत्वे घटवत्यपि
भूतलेऽभावप्रतीतिव्यवहारौ स्यातामिति चेन्न ॥ मैवं ॥ केवलभूतलस्याभावव्य-
वहारहेतुत्वात् । घटवत्त्वे तु तलादन्यभूतलत्वे चेत् केवलत्वं ॥ अन्योन्याभावव्यव-
हारो घटपटादिस्वरूपमात्रेणैव ते ॥ संसर्गाभावव्यवहारस्तु कपालभूतला-
दिना न वृत्तिः । कपाले प्रागभावप्रध्वंसाभावयोर्व्यवहारः । भूतलेऽत्यन्ताभावव्यवहारः ॥
अतो नातिरिक्ताभावे मानं किंचित्पश्यामः ॥ यथाहुः ॥ भावान्तरमभावो हि कयाचित्तु व्य-
पेक्षया ॥ भावान्तरादभावोऽन्यो न कश्चिदनिरूपणादिति ॥ उच्यते ॥ अभावस्तावदलौकि-
कोऽभ्युपेयः ॥ अन्यथा नास्तीति प्रतीतिव्यवहारयोरनालंबनत्वापत्तेः ॥ तथाहि ॥ व्यवहारो यव-
हर्तव्यपदार्थज्ञानसाध्यः ॥ न च घटादिस्वरूपं भूतलं वा व्यवहर्तव्यं किं त्वभावो न तु
ज्ञानं च तेन विना न संभवति ॥ अतोऽभावो ज्ञानविषयोऽतिरिक्तोऽस्तीति प्रत्यक्षादे-
र्नान्यथासिद्धिः ॥ किं च भूतला[illegible]देरभावत्वे सप्रतियोगिकत्वापत्तिः ॥ अभावस्य घ-
टाभावः पटाभाव इति प्रतियोगिसापेक्षत्वात् ॥ अपि च स्वरूपस्यान्योन्याभावत्वे

मि०

प

द्रानत्त्वसम्बन्धेनयत्रन्याविषीयतेतत्कालेकजिज्ञासा न स्यात्॥ [illegible] ग्रहणेतैवान्योन्याभा
वरूपभेदग्रहणात्॥ रज्जावेसर्प इति विभ्रमो न स्यात्॥ रज्जुरूपग्रहणेनाधिरोषस्वग्रा
नसात्॥ अविवेकाभावात् नास्त्येव विभ्रमो मममतेसर्वेतानानीयथार्थवादितिचे
न्नारज्जुरियंसर्पोनायमितिसकललोकानुभवबाधप्रसंगात्॥ लौकिकपरीक्षक
सिद्धविभ्रमानंगीकारगुरोरपिलघुतापत्तेः॥ अपि च केवलमभावद्रव्यत्वेवाकिमिदं नै
वेत्यभूतलमात्रेवेन घटवत्यपिघटाभाववत्त्वव्यवहारप्रसंगात्॥ अभावाभावाभ्यामत
लवेन अभाववत्ताव्याप्तेः॥ घटवद्भूतलेभिन्नेभूतलेकैवल्यमित्यबोधवित्तिचेन्न॥
नहिभिन्नाभावोस्वीकृत एव। अभावाधारसौतुमतेनरण घटवद्भूतलभिन्नेवैकाल्योभा
वात्॥ तस्माद्घटवत्तारान्यथानुपपत्त्याप्रसन्देहेततावातिरिक्तोनाभावोऽभ्युपगन्तव्यः॥ अत
स्त्यौपपत्याधिविवादःसफल एव॥ ननु नववभावोऽस्तिकस्यापितद्ग्राहकंप्रमाणं
किमितिचेन्नाध्यक्षविसृष्टत्वेयथाहिभूतलेघटोनास्तीति। धेविदत्तमानावणावहु
भावेनचक्षुसाभाववत्ताने॥ ननु भूतलेघटाभावग्रहोनप्रत्यक्षेणार्द्रियाभावयोःसं
वेधाभिरूपत्वात्॥ अपितुयोग्यानुपलब्ध्यामहत्त्वात्येतोरिन्द्रियंबाधाधारमात्रेतु ॥ ५०॥

प्रसंगो ॥ ननु नष्टे घस्यापि त्वगिंद्रियेण ग्राबारेऽस्तु केवलमित्यत आह तेनास्य रूपप्रतियोगि
स्मरतो नीलाभावग्रहप्रसंगः । मम मते तु घस्याप्रतियोगिनीलरूपग्राहकं चक्षुरा
मौ वाल्वायौ प्रसंग इति चेन्न । मन्मतेऽपि हि तत्र प्रतियोगिग्राहकेंद्रियेणाधिकरणग्र
हणाभावान्नातिप्रसंग इति चेन्न । उच्यते ॥ इह भूतले घटो नास्तीति ज्ञानमिंद्रियज
न्यं । अपरोक्षत्वात् । रूपज्ञानवत् । अबाधपरोक्षत्वमसिद्धं ॥ इंद्रियान्वयव्यतिरेका
नुविधानेन । तत्त्वोचनात् ॥ अभावस्येंद्रियग्राह्यत्वसिद्धिः ॥ नवेंद्रियाभावसंबं
धाभावबाधः । इंद्रियसंबंधभूतले विशेषणतया विशेष्यभावस्येंद्रियसंबंधत्वात् ।
नयाऽभावज्ञानमिंद्रियजन्यं । अज्ञानकरणजन्यत्वात् ॥ रूपादिज्ञानवत् ॥ नचासिद्धिः ॥
अनवस्थाशिया अनुपलब्धेरज्ञाततया एव करणत्वांगीकारात् ॥ अभावस्यानें
द्रियकत्वे वायौ रूपाभावो नेंद्रियं गृह्यते ॥ अनुपलब्धिसहकारि प्रतियोगिग्राहके
ण चक्षुषा वायोराधारस्याग्रहणात् ॥ [illegible] प्रत्यक्षो रूपाभावस्तत्रानुमानमिति
चेन्न लिंगाभावात् । रूपवत्त्वेनाऽनुपलभ्यमानत्वस्य लिंगत्वे वायुविशेष्यकानुमि
तिरेव स्यात् न रूपाभावविशेष्यका । तामेतरेणावायौ रूपाभाव इति तादृशेष्यकानुप

त्पन्नेः॥ तस्मात् कुविन्दि ३ येतत्कुविन्दात्तुमानेनावाभावग्रह इति॥ हि॥ न तु नास्य
स्यैवं चाप्रवृत्तिः॥ उद्देशो लक्षणपरीक्षा चेति॥ ननु अत्रासैव उद्देशसवैद्रप्रकरणे तु
दृशीतीक्ष्णावत्परीक्षापि कर्त्तव्येत्यत आह॥ अपरमिति॥ एतच्छितोऽपरपक्षनेसु
बोधमित्यर्थः॥ यद्वा अपरेप्यवान्तरभेदा वैशिष्ट्यविशेषणादयो लक्षणीया [illegible] आ
अपरमिति॥ सुबोधत्वमेवाह॥ वैशिष्ट्यमिति॥ यद्यपरीक्षादिकं न वेतु सुबोधं वैशिष्ट्यादेर
तथापि तस्य लक्षणं कुतो नोक्तमत आह॥ विशिष्ट्यमिति॥ नीलमुत्पलमित्यत्र नीलेनानीलव्यावृत्ति
रुत्पले क्रियते। अतोऽन्यव्यावृत्तिर्वैशिष्ट्यमित्यर्थः॥ वैशिष्ट्यं हि विशेषणाधीनमिति तल्लक्षयति
समानेति॥ व्यावर्त्तकं व्यावृत्तिबुद्धिजनकं। इतरव्यावृत्तिः [illegible] यस्य समानमेकमधिकरणं यस्य तत्तथा॥ द
ण्डरूपविशेषणं स्यादिं व्यावृत्यापि सममेकस्मिन्न दण्डेऽतिवर्त्तमानत्वात् समानाधिकरणमित्यर्थः॥ व्याव
र्त्तकत्वमात्रे सूपर्यन्तं लक्षणं जपादावप्यस्ति ततो विशिष्य नत्वि समानेति समानाधिकरणमिति रूपके रूपर
साद्यो अतिप्रसंगस्ततो व्यावर्त्तकेति॥ न हि रूपरसादि समुत्ते नश्चि किं [illegible] व्यावर्त्तते किं तु समा
नाधिकरण्यमत आह॥ एकेति॥ एकासमानाविभक्ति रेते ययोः पदयोः त[illegible]तात्पर्यं तदलिधे
यत्वमित्यर्थः॥ ए ननु रूपाद्याव्याप्तिर्धीयते॥ ० अवयवार्थस्फूरूपवग्राह्यम्॥ पदवा [illegible] जयाभिस्ता
पसस्याद्दैवैय्यधिकरण्यमस्तीति तन्नुदासाय एकविभक्तीति॥ विशेषणप्रतियोगिताऽऽपल ४९५

KKSU LIBRARY
RAMTEK
441 106
M-1745
Dist. Nagpur

```
[OrderDescription]
,CREATED=29.09.20 16:28
,TRANSFERRED=2020/09/29 at 16:43:11
,PAGES=96
,TYPE=STD
,NAME=S0003769
,Book Name=M-1746-MITBHASHANI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
```

```
FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
```

```
FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
```

```
FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,
```